आरण्यकम् (XIX/2) सितम्बर 2012 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
 - स्व. पण्डित कमलाकान्त उपाध्यायः
 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
 -श्री देवकुमार मिश्रः 'अलमस्त'
 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
 - श्री नर्मदेश्वर ओझा
 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
 - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
 204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

## संस्कृतप्रसारपरिषद्
आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहारः)
सरस्वती नः सुभगा मयस्करत्

ऊनविंशं वर्षम्, द्वितीयोऽङ्कः
सितम्बर 2012

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
(क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे,महावीरस्थान,मौलाबाग,आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
(ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना **'आरा' ( विहारः )** नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005** इति सङ्केतेन दूरभाषः-0542-2310561, (चलः) 09450870788 ई-मेल् gopabandhuh@gmail.com विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षाङ्कौ - ऊनविंशं वर्षम्, द्वितीयोऽङ्कः

चैत्रः, वि.सं. २०६९

सितम्बर, २०१२

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि    वार्षिकं शुल्कं ५० रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), नई दिल्ली
इत्यस्य पक्षतः आर्थिकानुदानेन प्रकाशितम्।

**परामर्शदात्री समितिः**
डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

⊛

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

⊛

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस् (फ्रान्स)

⊛

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

⊛

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

⊛

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

आकाशो नित्य एकोऽनन्तश्च। कदा केन विधिना आकाशोऽजायतेत्यत्र बहुविधा कल्पना विविधा दार्शनिका राद्धान्ताः प्रवर्तन्ते। एषोऽवर्णोऽपि दृष्टेः स्वभावात् नीलवर्णतामेति। एषोऽखण्डोऽपि उपाधिभेदविवेकात् घटाकाशः, मठाकाश इति भेदानारोहति। एष शब्दवानपि निःशब्द इव भासते। एषोऽनाच्छादनीयोऽपि मेघशकलैराच्छाद्यते। एषोऽगतिकोऽपि विपरीतिदिशि तीव्रगतिशीलेन अपरेण गतिमान् इव प्रतीयते। आकाशस्य साहित्यं केन सह न सङ्कल्पितम्? चित्तम् आकाश इव प्रतिभासमानं 'चिदाकाश' पदेन ऊह्यते। हृदपि आकाशवत् निर्मलं विवेचितं चेत् 'हृदाकाश' शब्देन व्यपदिश्यते। आकाशे सूर्यो विहरति, चन्द्रो वर्धते क्षीयते च, तारकाः उद्भासन्ते। ईदृक्तया इयत्तया वा आकलयितुम् अक्षमोऽयमाकाशः ईदृक्ताम् इयत्तां चाश्रित्य विद्यमानेष्वखिलेषु चेतनेषु जडेषु च सुतरां व्याप्नोति।

आकाशो न केवलम् अनन्तः अपि तु असक्तोऽप्येषः। शरदृतौ आकाशं पश्यामः। रात्रौ आकाशेऽसंख्याः अपरिमेयाः तारकाः ग्रहाः नक्षत्राणि च भवन्ति। आकाशः तैः पूर्णः तथा च प्रकाशपुञ्जान्वितः भवति। चन्द्र उदेति, चन्द्रिकां वितनोति किं च अस्तमप्येति। सम्पूर्णायां रात्रौ आकाशस्य निलये प्रकाशपुञ्जानामेतेषां महोत्सवो भवति। शुक्ले पक्षे वर्धिष्णौ चन्द्रमसि उत्सवोऽयम् उत्तरोत्तरम् औत्कर्ष्यं भजते। तत्रैतेषां शीतरश्मीनां प्रकाशस्वरूपसमवायानां महासम्मेलनस्य उदात्त आतिथेयः आकाशः प्रफुल्लितः सानन्दम् उद्भासितश्च दृश्यते। किन्तु प्रातः? उदीयमाने भास्करे सर्वे ते शीतलकायाः प्रकाशपुञ्जाः तिरोहिता भवन्ति इत्यतः आकाशः शून्यतामवाप्नोति। एको लघुतमः प्रकाशोऽपि न भवति आकाशस्य तस्मिन् महानिलये। तदा एष आकाशः गृहसन्त्यक्तः दिग़म्बरः कश्चित् संन्यासीव परिलक्ष्यते। परन्तु उभयोः दशयोः अर्थात् प्रकाशपुञ्जैः सह सम्पन्नताऽवधौ किं च प्रकाशराहित्येन विपन्नताकाले एषः आकाशः निर्लिप्तो निर्विकारः समसुखदुःखस्वभावः सन् विराजते इति एतस्य नैसर्गिकी अनासक्तवृत्तिः परिस्फुटैव। प्रकाशपुञ्जसाहित्येन तादृशं सौख्यप्रदं समुल्लासकरमुपचयम् अवाप्येदानीं प्रातः आ दिनम् आत्मनः निलयो रिक्तो मित्ररहितश्च सन् उष्णारश्मेः तापं सहते। एषः यथा शीतप्रभान् ज्योतिःपुञ्जान् न स्वागतीकरोति, तथा दिवसे उष्णप्रभं भास्करं न अपाकरोति। उभयत्र समावस्थां स्थितप्रज्ञताम् अनासक्तभावं

च पुरस्करोति। सः केवलं स्वधर्मम् आविष्करोति। किं वात्र प्रेरकं तत्त्वं स्यादिति प्रश्ने उदिते तद्धेतुरूपेण लोकसंग्रहम् उपस्थापयति श्रीमद्भगवद्गीता, यथाह भगवान्-

**सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।**
**कुर्याद् विद्वाँस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्।।** (गीता 3/25)

प्रकाशसाहित्यं वैभववैशद्यं व्यापारामान्द्यं व्यापकैश्वर्यं च सर्वेषां जिज्ञासितम् अभीप्सितं प्रयत्नविषयश्च भवति, किन्तु तत्तत्प्रसङ्गे अनासक्त्या प्रवृत्तिस्तु विरलानामेव स्यात्। आकाशस्य पूर्वोक्ता प्रात्यहिकी स्थितिः अस्मान् किमपि विशिष्टं सूचयति किम्? केनचित् कविना हिन्दीभाषया पङ्क्तिरेषाऽभिहिता–

**संसार में ऐसे रहो**
**जैसे तुम्हारा सब कुछ है।**
**संसार से ऐसे जाओ**
**जैसे तुम्हारा कुछ भी नहीं।।**

(यथा तव सर्वस्वं किमपि अत्रैव इति विचिन्तयँस्त्वं संसारे वर्तस्व, किं च तव किमपि अत्र नास्तीति विचारमादाय संसारात् प्रतिष्ठस्व।)

शीतप्रकाशपुञ्जैः लिप्त इव प्रतीयमानोऽपि आकाशः निर्लिप्तः, प्रकाशमय इति अभिहितोऽप्येष प्रकाशाप्रकाशनिरपेक्षः, शीतकरेण श्लिष्टदेहोऽप्यसौ (दिवसे) उष्णकराश्लेषी, (रात्रौ) अलस इव परिलक्ष्यमाणोऽपि (दिवसे) अविरतव्यापारो निरलस एव विद्योतते। निर्लिप्तोऽयम् आकाशः पतितास्वपि तारकासु कदापि न शोचतीति तस्य ताटस्थ्यं प्रकटयन् हिन्दीभाषायाः प्रख्यातः कविः श्रीहरिवंशरायबच्चन आह-

**जो बीत गयी सो बीत गई**
**जीवन में एक किनारा था**
**माना वह बेहद प्यारा था**
**जो टूट गया तो टूट गया**
**अंबर के आँगन को देखो**
**उसके कितने तार टूटे,**
**पर पूछो टूटे तारों से**
**अम्बर कब शोक मनाता है?**

(यद् गतं तद् गतम्, कामं जीवनस्य तटविशेषः अतीव प्रियः आसीत्, किन्तु सः भग्नश्चेत् भग्नः एव। आकाशस्य प्राङ्गणं पश्य, कति तारकाः ततो भ्रष्टाः, किन्तु ताः तारकाः पृच्छ, तासां कृते आकाशः कदापि शोकम् आचरति?)



चिदाकाश इति रूपकम्, चिदत्रोपमेयम्, आकाशस्योपमानता च। उपमेयापेक्षया उपमानस्य यद् गरीयस्त्वं सामान्यतया विविच्यते, तत्तु उपमानरूपे आकाशे विद्यते, तद्यथा-व्यापकता, अखण्डता, एकतेत्यादि। तर्हि कः तावदत्र उपमानोपमेययोः साधारणधर्मः स्यात्? किं चिदि एतादृशाः व्यापकता-अखण्डता-निर्लिप्तता-असङ्गतादयो धर्माः सम्भाव्यन्ते। जागतिकी चेतना तु सामान्यतः 'अहम्' इत्यतः आरभ्य 'अस्मि' इत्यत्र परिसमाप्तिमेति, शिष्टं यत् किमपि अनुभूयते, तत् सर्वम् 'अहम्' इत्येतत् परितः अनुस्यूतमेव भासते, तद्यथा-मम पुत्रः, मया विहितम्, मह्यं ददातु इत्यादि। अत एवोपनिषद्युक्तम् अस्ति-"आत्मनस्तु कामाय सर्वं प्रियं भवति। (बृहदारण्यकोपनिषद् 2.4.5) इति। अर्थात्, आत्मकामम् आत्मकामसन्नद्धं विषयं च विहाय चित्तमन्यत्र न प्रवर्तते। इन्द्रियाणाम् आकर्षणं, तत्तदिन्द्रियद्वारा बलात् संयोजनं च अतिरिच्य चिदन्यत्र न श्लिष्यति। सुखं दुःखं मोहं वा परिहाय तत्तन्निरपेक्षतया कुत्र वा प्रवर्तेत एषा चित्? एतादृश्यामवस्थायां चिदः आकाशेन सह सादृश्यं भूयः यत् प्रदर्श्यमांनं लभ्यते, तत् किं खण्डितरूपेण आकाशस्य स्वरूपम् आदाय, उत चिदः अन्यतमं किमपि विशिष्टं स्वरूपम् आदायेति विमर्शनीयोऽयं विषयोऽस्ति। 'घटाकाशः' 'मठाकाशः' इत्यादौ तु आकाशस्य तत्तद्देशावच्छिन्नतां खण्डितं वा स्वरूपमादाय व्यवहारो भवत्येव। किन्तु 'चिदाकाशमाकाशवासं भजेऽहम्' (सन्तकविः तुलसीदासः) इत्यादौ चिदाकाशस्य य उल्लेखो लभ्यते, तत्र नूनमेव चिदो वैशिष्ट्यम् आदाय उपन्यास एष कल्पितः स्यात्। सामान्यतः ज्ञानेन्द्रियैः सह अन्वितं चित्तं दृढसंस्कारवशात् यमनियमादिविविध-प्रयासकारणेन तत्तद्वृत्तिनिरोधकारणेन वा क्रमशः व्यापकतां भजते इति इहलोके आधुनिककालेऽपि मानवशरीरेण मानवोत्तराणि असामान्यानि कर्माणि साधयन्ताः श्रीरामकृष्णपरमहंसस्वामिविवेकानन्द–महर्षि अरविन्दमहर्षिरमणतुल्या महापुरुषाः एव प्रमाणम्। तेषां शरीरे तदितरशरीरेषु इव इन्द्रियेषु सत्सु, तेषां चिद् इतरेषां चिदिव संकीर्णा अभूत्वा निखिलविश्वव्यापिनी आसीदिति तेषामाचरणैः वचनैश्च बहुशः प्रमाणितम् अस्त्येव। यदा विश्वकविः रवीन्द्रनाथो गायति–

**एइ भारतेर महामानवेर सागरतीरे**
**एसो हे आर्य एसो अनार्य...**

(आगच्छत हे आर्याः, आगच्छत हे अनार्या!... अस्मिन् महामानवानां सागरतटे भारताख्ये स्थले....)

तदा कविहृदयं सर्वविधं भौगोलिकं सीमानम् अखिलं च देशकालादिगतां संकीर्णताम् उत्तीर्य जाति-धर्म-वर्ण-प्रान्त-भाषादिभेदनैरपेक्ष्येण निखिलमानवकल्याणाय करुणार्द्रं भवति। पृथिव्यां यत्र कुत्रापि यः कोऽपि या च काऽपि वा स्यान्नाम, तस्य तस्या वा हार्दभावनया

सह कविहृदयं साधारणीकृतचेतोवृत्त्या समानं संजायते। ततः सः औदात्त्येनोच्चारयति-

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि।।**

(ऋग्वेदः10.191.3)

तदा तस्य चिद् आकाश इव सुविशाला सर्वान् अन्तर्भावयितुं समर्था, सर्वेषां पीडां दुःखं दैन्यम् आत्मस्थमिव स्वगतमिव वा अनुभवितुं सिद्धा भवति। तदानीमेव कश्चिद् राजा दुष्यन्तः कस्यचिदपि वियुक्तप्रियजनस्य सामान्यस्य जनस्य पीडाम् अपाकर्तुं सन्नद्धो भूत्वा उद्घोषयति-

**किमनेन सन्ततिरस्ति नास्तीति?**
**येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।**
**स स पापादृते तासां दुष्यन्त इति घुष्यताम्।।** (अ.शा. 6/23)

एतादृशे सर्वव्यापिनि सर्वलाभप्रदायिनि स्वसुखनिरभिलाषिणि मानवीये व्यवहारे किं मानं को वा आधारः, किं वा प्रेरकम्? सम्यग् अनुध्यायेत चेत् स्पष्टतयेदम् अवगन्तुं शक्ष्यते यत् तत्तद्वृत्तौ तत्तज्जनस्य चिद् आकाशवद् अपरिमेया अखण्डा जगद्व्यापिनी सर्वान्तर्भाविनी च सञ्जातेति। अथ च तदा पञ्चसु महाभूतेषु अन्यतम आकाशोऽपि चिदः अणोरणीयांसं महतो महीयांसं च विग्रहं समीक्ष्य आत्मनि कदाचिद् न्यूनताम् अनुभवितुमपि शक्नुयात्। तदानीं तेषाम् आकाशवच्चिद्वृत्तां स्वभावस्तथा भवति यं परिमातुं कोऽपि शक्तो न भवत्येव, तथा चेदमुच्यते एवंप्रकारेण-

**वज्रादपि कठोराणि मृदूनि कुसुमादपि।**
**लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति।।**

तदेव पुनः 'यत् पिण्डे तद् ब्रह्माण्डे' इति सिद्धान्तः सिद्धो भूत्वा पुरतः उपतिष्ठते। वज्रं तु सर्वथा स्वभावेन कठोरं भवति, किं च कुसुमं कोमलमेव भवति। किन्तु तादृशः केचन लोकोत्तराः अस्मिन् लोके जनिं लभन्ते, येषु न्यायोचितमार्गानुसरणप्रसङ्गे वज्रादपि कठोरता, किं च परहितचिन्तनप्रसङ्गे कुसुमादपि कोमलता स्फुटा भवतीति ते वैशिष्ट्यम् आदधते।

एतादृशं वैशिष्ट्यमातन्वतां कवि-शास्त्रकार-दार्शनिकानां तत्तत्क्षेत्रगतां व्यापकताम् अध्येतुं विमर्ष्टुं च प्रयतमानेभ्यः शोधलेखकेभ्यः नतिततिं विनिवेद्य सहृदयानां पुरतः आरण्यकस्य अङ्कमिमम् उपस्थापयितुम् उत्सहे।

गोपबन्धु मिश्र
सम्पादकः, आरण्यकस्य



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. मेघदूते यक्षकान्ताया विशेषणविमर्शः | डा. व्रजसुन्दर मिश्रः अध्यापकः, संस्कृतविभागः, साधुगौरेश्वर महाविद्यालयः, कनिकापडा, याजपुरम् (ओडिशा) | १ |
| २. अग्निपुराणोक्तकाव्य-लक्षणसमीक्षा | डा. श्यामानन्द मिश्रः आसो. प्रोफेसर, साहित्यविभागः, संस्कृतविद्याधर्मविज्ञानसंकायः, काशी हिन्दू विश्वविद्यालयः, वाराणसी | १३ |
| ३. अद्वैतवेदान्तदर्शनालोकेन जीवस्यावस्थात्रय-स्वरूपावलोकनम् | डा. मीनाक्षी रायः डा. करुणानन्दमुखोपाध्यायः असिस्टेन्ट प्रोफेसर, संस्कृतविभागः, कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः, वाराणसी | २३ |
| ४. लट्लकारार्थविज्ञानम् | डा. चन्द्रमाधवसिंहः नरमानिवासः, ब्रह्मस्थान रोड, बालुधार मुजफ्फरपुरम्, बिहारः | ३९ |
| ५. नागार्जुनस्य संस्कृतसाधना | डा. सुनीलकुमार प्रधानः संस्कृतशिक्षकः, ज्ञाननिकेतनम्, पटना | ४५ |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ६. शब्दवृत्तिविचारः | डा. रामनारायण द्विवेदी<br>आसि. प्रोफेसर, व्याकरणविभागः<br>राजकुमारी गणेश शर्मा संस्कृत विद्यापीठम्<br>कोलहन्टा पटौरी, दरभंगा (बिहारः) | ५१ |
| ७. वृक्षदोहदमूलककविप्रसिद्धीनां समीक्षणम् | बबुआनारायण मिश्रः<br>शोधच्छात्रः, संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | ५७ |




# मेघदूते यक्षकान्तायाः विशेषणविमर्शः

**डा. व्रजसुन्दर मिश्रः**

कविकुलतिलकस्य कालिदासस्य मेघदूतं काव्यकलादृष्ट्या यथा अनन्यम्, गवेषकाणां गवेषणायै अपि तथा असाधारणं प्रेरणास्रोतोऽस्ति। तेन क्रमेण मेघदूते प्रयुक्तानि यक्षकान्तायाः विशेषणानि अधिकृत्य शोधपत्रमिदं रचितमस्ति।

विशेषणस्य संज्ञाविषये पाणिनेर्व्याकरणं नीरवं दृश्यते। किन्तु व्यवहारात् ज्ञायते यद् विशेष्यस्य रूप-गुणावस्था-संख्यादिकं च यद् बोधयति तद् भवति तस्य विशेष्यस्य विशेषणम्, विशिष्यतेऽनेन इति विशेषणमिति व्युत्पत्तेः।

मेघदूते यक्षकान्तायाः कृते यानि विशेषणानि प्रयुक्तानि तानि सर्वाणि मुख्यतो भागद्वयेन विभाजयितुं शक्यन्ते–साधारणविशेषणनि विरहविशेषणानि चेति। यानि विशेषणानि यक्षिण्याः स्वाभाविकं रूपगुणादिकं बोधयन्ति तानि भवन्ति साधारणविशेषणानि। यानि विशेषणानि तु विरहसमये प्रपीडितायाः तस्याः अवस्था-दैन्य-कर्मादिकं च सूचयन्ति तानि भवन्ति विरहविशेषणानि।

**साधारणविशेषणानि**–समग्रे मेघदूते यक्षकान्तायाः कृते त्रिंशत्-संख्यकानां साधारणविशेषणानां प्रयोगः कृतो विद्यते, तद्यथा–

**अबला**[1]- अल्पं बलमस्या इति अबला। अल्पार्थे नञ्। अस्मात् ज्ञायते यद् यक्षकान्ता विरहं सोढुमसमर्था। अत एव यक्षस्तस्या जीवन-रक्षार्थं मेघमाध्यमेन स्वकुशलसन्देशं प्रेषयितुमियेष। अबला-शब्दोऽपि योषितां पर्यायवाचकशब्दत्वेन पठितोऽस्ति। यथा-'स्त्रीयोषिदबला योषा नारी सीमन्तिनी वधूः।[2]

**अविधवा**[3]-विगतो धवः पतिर्यस्याः सा विधवा। 'धवः प्रियः पतिर्भर्त्ता।'[4] विधवा गतभर्तृका एषा नास्तीति अविधवा सभर्तृका। अनेन भर्तुः जीवनसूचनादनिष्टाशङ्का वारिता।

**अव्यापन्ना**[5]-व्यापन्न-शब्दस्य अर्थो भवति मृतः।[6] नं व्यापन्ना अव्यापन्ना अर्थात् जीविता। अस्मात् सूच्यते यद् यक्षिणी पुनर्मेलनस्याशया जीविता वर्त्तते।

**असितनयना**[7] - असिते नयने यस्याः सा अर्थात् कृष्णवर्णनयनविशिष्टा। असितनयनं रमणीनां सौन्दर्याधिक्यप्रतिपादकं भवति। एतदपि अलंकारशास्त्रसम्मतम्।[8] अत्र असित-शब्दः कृष्णवर्णस्य द्योतकोऽस्ति। कोषशास्त्रेऽपि असित-शब्दस्य स एवार्थोऽभीष्टः। यथा-'कृष्णे नीलासितश्यामकालश्यामलमेचकाः।[9] अस्मात् यक्षकान्ताया नयनयोः सौन्दर्याधिक्यं सूच्यते।

**एकपत्नी**[10]- एकः पतिः यस्याः सा। अस्मात् सूच्यते यद् यक्षिणी पतिव्रता आसीत्। पति-शब्दस्तु धवार्थे प्रयुज्यते।[11] पत्नीशब्दस्य अर्थो भवति-'वेदविधानेनोढा।[12]

**कल्याणी**[13]-कल्याणमस्याः अस्तीति कल्याणी। कल्याण-शब्दस्तु मङ्गल-शुभाद्यर्थं द्योतयति। यथा-'श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्।[14] पुनश्च सर्वसुलक्षणसंपन्ना नारी एव कल्याणीति कथ्यते। महाभारते दमयन्त्यपि कल्याणीति विशेषणेन विभूषिता दृश्यते। यथा-'दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत।[15]

**कान्ता**[16] - काम्यते या सा कान्ता। अस्मात् सूच्यते यद् यक्षिणी यक्षस्य प्रियतमा आसीत्। पुनश्च कान्ता-शब्दस्य अर्थो भवति 'सर्वाङ्गसुन्दरी स्त्री।[17] अतो यक्षिणी सर्वाङ्गसुन्दरी आसीदिति ज्ञायते। पुनश्च कान्ता-शब्दोऽपि विशेषगुणयुक्ता रमणीत्यर्थे प्रयुज्यते।[18]

**गेहिनी**[19] - गृहस्य एकः पर्यायवाचकः शब्दो भवति गेहम्। यथा-'गुहं गेहो-दवहितं वेश्म सद्म निकेतनम्।[20] ततो गेहिनीशब्दस्य अर्थो भवति गृहिणी। एम्. उइलिअमस् - महोदयानां मतानुसारेणं गेहं भवति गृहस्य अपभ्रंशरूपम्। सर्वैः कोषकारैः गेहिनी - शब्दः गृहिण्यर्थे स्वीकृतः। यक्षिणी यक्षस्य गेहिनीत्यत्र भावः।

**चकितहरिणीप्रेक्षणा**[21]- चञ्चलनयना। चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा। नेत्रयोः चाञ्चल्यं युवतीनां सौन्दर्यं सूचयति। पुनश्च या चकितहरिणीप्रेक्षणा सा तु पद्मिनी नायिका[22] भवति। अतो ज्ञायते यद् यक्षकान्ता अतीव सुन्दरी पद्मिनी नायिका आसीत्। पुनश्च हरिणीनयनैः सह सुन्दरीरमणीनां नेत्राणां तुलना अलंकारशास्त्रसम्मतास्ति। यथा-

**मृगतन्नेत्रपाथोजतत्पत्रझषखञ्जनैः ।**
**नेत्रं चकोरतन्नेत्रकेतकालिस्मराशुगैः।।**[23]



**चटुलनयना**[24] - चञ्चलाक्षी। चटुले चपले नयने यस्याः सा। यक्षकान्तायाः नेत्रयोः सौन्दर्यं सूचयत्येतद् विशेषणम्।

**चण्डी**[25] - कोपना। यक्षः कथयति यद् विरहप्रपीडितः स प्रियङ्गुलतासु यक्षिण्याः शरीरमूं, चकितहिरणीप्रेक्षणे दृष्टिपातम्, शशिनि मुखच्छायाम्, मयूराणां बर्हेषु केशान्, प्रतनुषु नदीवीचिषु भ्रूविलासान् च अन्विष्य कस्मिन्नेकस्मिन्नपि सादृश्यं न प्राप्नोति।[26] या कापि स्त्री यदि जानाति यत् तस्याः पतिरन्यत्र तस्याः सादृश्यमन्विष्यति तर्हि सा नूनमेव क्रुद्धा स्यात्। तस्मिन्नेव प्रसङ्गे महाकविः चण्डीति विशेषणस्य प्रयोगं करोतीति भाति। किन्तु कुत्रापि तस्याः सादृश्यं नास्ति, ततस्तया क्रोधो न प्रकाशनीयः इत्यत्र व्यङ्ग्यम्।

**तन्वी**[27] - कृशाङ्गी। तनु कार्श्यमस्याः अस्ति एषा च सुन्दरी अस्तीति भावः। पुनश्च मनोहारिणी युवत्येव तन्वीति कथ्यते, यथा-

**जालिनी तण्डुला तन्वी काल्यम्बष्ठा मनोहरी।**[28]

पुनश्च अस्माद् विशेषणाद् ज्ञायते यद् यक्षिणी तन्वी आसीत्, न तु तनुतरा! तादृशी स्त्री प्रशस्या न भवतीत्यित्र व्यङ्ग्यमस्ति। यथा-

**अतिदीर्घा भृशं ह्रस्वा अतिस्थूला भृशं कृशा।**
**अतिगौरी भृशं काली षडेता वर्जिताः स्त्रियः।।**[29]

**दयिता**[30] - प्राणप्रिया नायिका। तद्यथा-

**प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया।**[31]

यक्षिणी यक्षस्य अतीव प्रियासीदिति ध्वन्यते।

**धातुः आद्या सृष्टिः**[32] - युवतीनां प्रपञ्चे ब्रह्मणः सर्वश्रेष्ठा अद्वितीया च सृष्टिः। सर्वोत्तमसुन्दरी। विधातुः प्रथमशिल्पम्। प्रथमनिर्मिता युवतिरियम्। सृष्टिप्रपञ्चे अन्यत्र कुत्रापि एवंविधं रमणीयं रमणीरत्नं नास्तीति ध्वनिः।

**निम्ननाभिः**[33] - गम्भीरनाभिविशिष्टा। निम्ना नाभिर्यस्याः सा। नारीणां नाभिगाम्भीर्यं मदनातिरेकं सूचयति। अतो यक्षिणी कामकुशला इति सूच्यते। पुनश्च ह्रदकूपादिभिरेव नाभेः तुलना क्रियते। यथा-'नाभिरब्जजलावर्त्तह्रदकूपनदादिभिः।[34]

**पक्वविम्बाधरोष्ठी**[35] - लोहिताधरविशिष्टा। पक्वं परिणतं विम्बं विम्बिकाफलमि-

वाधरोष्ठो यस्याः सा, स्निग्धारुणकोमलाधरा। सुन्दरीणां कामिनीनामधरस्य रक्तिमा, विशेषतो विम्बफलेन सह तस्य तुलना च अलंकारशास्त्रसम्मतास्ति। यथा-

**प्रवालविम्बबन्धूकपल्लवैरधरौष्ठकौ।**

**करवालविशेषेण धनुषा मन्मथस्य च॥**

**वर्ण्यौ माधुर्यमाश्रित्य यावन्मधुरवस्तुभिः।**

**गुणा अत्यन्तमाधुर्यमुच्छूनत्वं सुरक्तता॥**[36]

पुनश्च यस्याः ओष्ठौ विम्बफलवद्रक्तवर्णौ सा सर्वविधसुखप्रदायिनी भवति। यथा-

**ओष्ठौ च निर्व्रणौ स्निग्धौ नातिस्थूलौ न रोमशौ।**

**रक्तौ विम्बफलाकारौ धनपुत्रसुखप्रदौ॥**[37]

**परिमितकथा**[38]- अल्पभाषिणी। परिमितवाग्युक्ता। यक्षिणी मितभाषिणी आसीदिति भावः।

**प्रिया**[39] - प्रीणाति या सा।

यथा- **प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया।**[40]

यक्षिणी यक्षस्य सर्वविधानन्दप्रदायिनी आसीदिति ध्वनिः। रामायणे जनकनन्दिनी सीतापि भगवतो रामचन्द्रस्य प्रियासीदिति रामायणे वर्णितमस्ति। यथा–

**प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।**

**बाला**[41] - षोडशवर्षीया युवतिरेव बाला इति कथ्यते। यथा -

**बाला स्यात् षोडशाब्दा।**[42]

यक्षकान्ता षोडशवर्षीया यौवनसंपन्नासीदिति भावः।

**भ्रातृजाया**[43] - भ्रातुः जाया। यक्षः आत्मानं मेघस्य भ्रातृरूपेण उपस्थापयति। अतः यक्षस्य पत्नी भवति मेघस्य भ्रातृजाया।

**मध्येक्षामा**[44] - कृशोदरी। मध्ये शरीरस्य मध्यभागे उदरप्रदेशे क्षामा क्षीणा। अत्र 'अमूर्धमस्तकात् स्वाङ्गादकामे' इति पाणिनिसूत्रेण विभक्तिलोपो न भवति। मध्यशब्दोऽत्र मध्यभागार्थं क्षामशब्दः क्षीणार्थं च द्योतयतः। तथा चोक्तम्-



**मध्यमं चावलग्नं च मध्योऽस्त्री।**[45]

**क्षीणं क्षामं विशिलष्टं स्यात्।**[46]

**मानिनी**[47]-मनस्विनी। मानः अस्याः अस्तीति। जनानौचित्यासहिष्णुः। स्वचारित्रपरिरक्षणाभिमानशालिनी। विशेषप्रकारनायिका एव मानिनीति कथ्यते। चित्तसमुन्नत्यर्थेऽपि मानशब्दः पठितोऽस्ति। तद्यथा-**मानश्चित्तोन्नतौ गृहे।**[48]

**मृगाक्षी**[49] - मृगलोचनतुल्यनेत्रा। एतादृशे नयने कामिनीनां सौन्दर्याधिक्यं सूचयतः।

**यक्षस्य द्वितीयं जीवितम्**–यक्षिणी भवति तस्य द्वितीयं जीवितम्। यथा जीविते व्यपगते सति शरीरं विनश्यति तथा यदि जीविततुल्या यक्षिणी म्रियते तर्हि शरीरभूतो यक्षोऽपि पञ्चत्वं यास्यतीत्यस्मात् ध्वन्यते।

**शिखरिदशना**[50] - शिखराख्यमाणिक्यविशेषवत् स्निग्धधवलारुणदन्ती। शिखराणि एषां सन्तीति शिखरिणः कोटिमन्तः। तथा चोक्तम्-'शिखरं शैलवृक्षाग्रकक्षा-पुलककोटिषु।[51]

पुनश्च-'पक्वदाडिमवीजाभं माणिक्यं शिखरं विदुः।'[52] शिखरं पक्वदाडिमबीजाकारं माणिक्यं तद्वदुज्ज्वलतया दशना दन्ता यस्याः सा शिखरिदशना एतादृशा दन्ताः कामिनीनां सौन्दर्यं वर्द्धयन्ति। तथा चोक्तम्-'श्लक्ष्णैः स्निग्धैः सितैर्दन्तैः शोभनत्वं च गच्छति।[53] पुनश्च या नायिका शिखरिदशना सा स्वयं भाग्यवती, तस्याः पतिः आयुष्मान् च भवति। समग्रं विश्वमपि तस्याः वशीभूतं भवति। तथा चोक्तम्–

**स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः।**

**दन्ता भवन्ति यासां तासां पादे जगत्सर्वम्॥**

अपि च – **ताम्बूलरसरक्तेऽपि स्फुटभासः समोदयाः।**

**.दन्ताः शिखरिणो यस्या दीर्घं जीवति तत्प्रियः॥**[54]

यक्षिण्याः भाग्यवत्त्वं यक्षस्य दीर्घायुष्ट्वं चात्र सूच्येते।

**श्यामा**[55] –कुवलयदलश्यामवर्णा। प्रथमतः पूर्णयौवना युवतिः श्यामेति कथ्यते। यथा–

**श्यामा यौवनमध्यस्था प्रौढा निष्क्रान्तयौवना।**[56]

द्वितीयतः अप्रसूता तन्वी कामिन्येव श्यामेति कथ्यते। तद्यथा-

**अप्रसूता भवेत् श्यामा तन्वी च नवयौवना।**

तृतीयतः षोडशवर्षवयोयुक्ता मधुरभाषिणी युवतिः श्यामेति कथ्यते। तद्यथा-

**अप्रसूता भवेत् श्यामा श्यामा षोडशवार्षिकी।**
**श्यामा च श्यामवर्णा च श्यामा मधुरभाषिणी॥**

पुनश्च शीतकाले ग्रीष्मवदानन्ददायिनी ग्रीष्मे शीतवत् सुखप्रदायिनी तप्तकाञ्चनवर्णाभा कामिन्यपि श्यामेति कथ्यते। यथा-

**शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला।**
**तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते॥**[57]

पुनरपि या नायिका कोमलनखनयनदन्तयुक्ता, अहंकारशून्या, मानवती, कान्ते दृढस्नेहा, स्पर्शमात्रेण आनन्ददायिनी च भवति सा श्यामेति कथ्यते। यथा-

**स्निग्धनखनयनदशना निरनुशया मानिनी स्थिरस्नेहा।**
**सुस्पर्शशिशिरमांसलवराङ्गविवराङ्गना श्यामा॥**[58]

**श्रोणीभारादलसगमना**[59] - मन्दगामिनी। श्रोण्याः भारादलसगमना न तु जघनदोषादित्यस्मात् सूच्यते। श्रोण्याः कटिप्रदेशस्य भारः तस्माद्धेतोः अलसं मन्दं गमनं यस्याः सा। अत्र श्रोणीशब्दः कटिप्रदेशस्य वाचकः। तदुक्तम्-

**कटिः श्रोणिः ककुद्मती।**[60]

अस्माद् विशेषणाद् यक्षकान्तायाः श्रोणीभागस्य भारवत्त्वं, मन्दगमनं च सूच्यते।

**सखी**[61]–यक्षस्य सहचरी। समानं ख्यायते जनैः या सा। आलिः सखी वयस्या च[62] इति वचनानुसारं यक्षिणी भवति यक्षस्य यथार्थवयस्या। यक्षिणी सहधर्मिणीत्वाद् यक्षस्य वयस्यत्वाद् मेघस्य च सखी भवति। भार्यायाः कृते सखी-शब्दस्य व्यवहारः कविप्रसिद्धो वर्त्तते।[63]

**साध्वी**[64] –सती तथा पतिव्रता नारी एव साध्वीति कथ्यते।

यथा – **सती साध्वी पतिव्रता।**[65]

अस्मात् विशेषणात् सूच्यते यद् यक्षिणी सती पतिव्रता चासीत्। पुनश्च कान्ते



आर्त्ते सति या आर्त्ता, हृष्टे सति मुदिता, प्रवासे सति प्रोषिता, मृते च म्रियते सा एव साध्वीति कथ्यते। यथा-

**आर्त्तार्ते मुदिता हृष्टे प्रोषिता मलिना कृशा।**
**मृते म्रियते या पत्यौ साध्वी ज्ञेया पतिव्रता॥**[66]

भर्त्तरि दिवंगते तेन सह साध्वी नारी अग्निप्रवेशं करोति। तद्यथा-

**साध्वीनामेव नारीणामग्निप्रपतनादृते।**
**नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्॥**[67]

**स्तनाभ्यां स्तोकनम्रा**[68]-ईषदवनता। स्तोकं च नम्रा। स्तनभारेण ईषन्नम्रा, न तु वपुर्दोषात्।

**विरहविशेषणानि** - विरहावस्थायां विरहिण्यः किं किं कुर्वन्ति, ताभिः किं किं करणीयमित्यादिविषये शास्त्रीयं प्रमाणमस्ति। विरहिणी नायिका क्रीडां, शरीरसंस्कारं, सामाजिकोत्सवादिदर्शनं, हास्यं, परगृहे गमनादिकं च त्यजेत्। तत उक्तमस्ति-

**क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्।**
**हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका॥**[69]

पुनश्च विरहिणी नायिका विरहसमये विरहस्य अतिवाहितदिनानि अवशिष्टदिनानि च गणयेत्, वलिभुजे वलिं दद्यात्, कान्तप्रतिकृतिं विरच्य तदन्तिके सङ्गीतगानं कुर्यात्, देवाराधानं कुर्यात्, शुकशारिकादीन् पाठयेच्च। तद्यथा-

**गणयेच्चावधिदिनं दद्याद् बलिभुजे बलिम्।**
**लिखेत् कान्तप्रतिकृतिं गीतं गायेत्तदन्तिकम्॥**
**देवताराधनं कुर्यात् पाठयेत् शुकशारिकाम्।**
**एवंविधविनोदेन नयेत् कालं वियोगिनी॥**[70]

पुनरपि वियोगावस्थायां विरहिणी प्रियतमस्य सदृशानुभवनम्, चित्रकर्म, स्वप्ने प्रियतमस्य दर्शनम्, प्रियतमस्य अङ्गस्पृष्टानां वस्तूनां स्पर्शनं चाचरति, तदुक्तम्-

**वियोगावस्थासु प्रियजनसदृशानुभवनं**
**ततश्चित्रं कर्म स्वपनसमये दर्शनमपि।**

**विरहतनु यक्षसादृश्यं लिखन्ती**[93]- विरहेण कृशं यक्षप्रतिकृतिं विन्यस्यन्ती। विरहसमये विरहिणी प्रियतमस्य प्रतिकृतिं लिखेदिति प्रागेवोक्तम्। तेन क्रमेण यक्षिणी यक्षस्य प्रतिकृतिं लिखतीत्यस्मात् सूच्यते।

**विरहशयने सन्निषण्णैकपार्श्वा**[94] - विरहशयने विरहजन्यकामतापनिवारणार्थं पल्लवादिरचितशय्यायां सन्निषण्णैकपार्श्वा निहितगात्रैकदेशा। अस्मात् व्यज्यते यत् यक्षगतहृदयतया यक्षिणी शय्यायां पार्श्वपरिवर्त्तनं विस्मृत्य एकेनैव पार्श्वेन चित्रलिखित-वत् शेते स्मेति।

**शिशिरमथिता पद्मिनी**[95]-हिमहता नलिनी। शिशिरेण पद्मिनी यथा निष्प्रभतामुपैति तथा यक्षिण्यपि विरहव्यथया म्लाना जायते इत्यस्मात् सूच्यते। रामायणेऽपि वाल्मीकिना विरहिण्याः सीतायाः कृते एवंविधोपमा प्रदत्ता। तद्यथा–

**हिमहतनलिनीव नष्टशोभा व्यसनपरंपरया निपीड्यमाना।**

**सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना॥**[96]

**साभ्रे अह्नि स्थलकमलिनी**[97] - मेघाच्छादितदिवसे स्थलपद्मिनीव म्लाना। मेघेन सूर्ये आच्छादिते सति तत्किरणाभावात् स्थलकमलिनी म्लानतां भजति। तद्वद् यक्षस्यानुपस्थितौ यक्षिण्यपि मलिना भवतीत्यस्मात् सूच्यते।

**स्वयमपि कृतां मूर्च्छनां विस्मरन्ती**[98] - यक्षिणी स्वयम् आत्मना कृतां विरचितां मूर्च्छनां स्वरारोहावरोहक्रमं विस्मरतीत्यस्यात् ज्ञायते। अनेन तस्याः मूर्च्छारूपा नवमकामदशा सूच्यते।

❖



## सन्दर्भग्रन्थाः


1. मेघदूतम्, 2 तत्रैव, 98
2. अमरकोषः, 2.6.2
3. मेघदूतम्, 96
4. अमरकोषः, 2.6.35
5. मेघदूतम्, 10
6. शब्दकल्पद्रुमः
7. मेघदूतम्, 109
8. मृगतनेत्रपाथोज - तत्पत्र - झषखञ्जनैः।
नेत्रं चकोर - तन्नेत्र - केतकालिस्मराशुगैः।।
कुमुदेन च मत्तेन चकोरेण च वर्ण्यते।
गुणाः स्नैग्ध्यं विशालत्वं लोलतापाङ्गदीर्घता।
नीलता प्रान्तलौहित्यं शैत्यं निविडपक्ष्मता।। रसकल्पद्रुमः 2.1.151-152
9. अमरकोषः 1.5.14
10. मेघदूतम्, 10
11. अमरकोषः 2.6.35
12. शब्दकल्पद्रुमः
13. मेघदूतम्, 106
14. अमरकोषः, 1.4.25
15. महाभारतम्, 3.74.5
16. मेघदूतम्, 1 तत्रैव,72 तत्रैव, 76
17. शब्दकल्पद्रुमः
18. प्रमदा मानिनी कान्ता, अमरकोषः,2.6.3
19. मेघदूतम्, 74
20. अमरकोषः, 2.2.3
21. मेघदूतम्, 79
22. चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे, रतिरहस्यम्, 1.11
23. रसकल्पद्रुमः, 2.1.151
24. मेघदूतम्, 105
25. तत्रैव, 101
26. मेघदूतम्, 101
27. मेघदूतम्, 79
28. वैजयन्तीकोषः, 3.8.77
29. सामुद्रिकशास्त्रे
30. मेघदूतम्, 4
31. अभिधानचिन्तामणिः, 3.179
32. मेघदूतम्, 79
33. तत्रैव, 79
34. रसकल्पद्रुमः, 2.1.298
35. मेघदूतम्, 79
36. रसकल्पद्रुमः, 2.1.99
37. सामुद्रिकशास्त्रे 80
38. मेघदूतम्, 80
39. तत्रैव,7 तत्रैव, 81
40. अभिधानचिन्तामणिः, 3.179
41. मेघदूतम्, 80
42. रसकल्पद्रुमः, 2.5.529 अपि च - अनङ्गरङ्गः, 4.1
43. मेघदूतम्, 10
44. मेघदूतम्, 79

तदङ्गस्पृष्टानामुपनतवतां स्पर्शनमपि

प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदितः॥[71]

मेघदूते विरहव्यथितायाः यक्षकान्तायाः प्रसङ्गे एतेषु कृत्येषु बहूनामाचरणं वर्णितं दृश्यते। तस्मिन्नवसरे यक्षिण्याः यानि विशेषणानि प्रयुक्तानि तेषां विवेचनमत्र प्रस्तूयते।

**अवनिशयना**[72] – भूमिशायिनी। अवनिः भूमिरेव शयनं शय्या यस्याः सा। यक्षिणी विरहव्यथया प्रपीडिता सती भूमौ शयनपरायणासीदिति ध्वन्यते।

**अहनि सव्यापारा**[73]– दिवसे कर्मतत्परा। अहनि दिवसे व्यापारैः गृहकर्मभिः सह वर्त्तमाना।

**आधिक्षामा**[74] – आधिना मानसिकव्यथया क्षामा कृशा। मानसिकव्यथैव आधिरिति कथ्यते। यथा-'पुंस्याधिर्मानसी व्यथा।[75] क्षामाशब्दस्य अर्थो भवति क्षीणा अथवा कृशा। यथा-'क्षीणं क्षामम्।[76] अस्मात् सूच्यते यत् यक्षकान्ता विरहजन्यमानसिकव्यथया कृशा जाता।

**उत्कण्ठोच्छ्वसितहृदया**[77] – उत्कण्ठया औत्सुक्येन उच्छ्वसितहृदया विकसितचित्ता। उत्कण्ठाशब्दस्य अर्थो भवति इष्टलाभे कालक्षेपासहिष्णुता, कामादिजातस्मृतिः, उत्केन दयितस्मरणम्, प्रियाभिलाषादुन्मनस्कत्वं च।[78] अस्मात् ज्ञायते यत् मेघात् यक्षस्य सन्देशश्रवणमात्रेण यक्षिणी उत्कण्ठया प्रसन्नहृदया स्यात्।

**उन्निद्रा**[79] – उत्सृष्टशयना। अस्मात् सूच्यते यद् विरहदुःखेन यक्षिण्याः निद्रा दूरीभूतासीत्। अनेन तस्याः निद्राच्छेदरूपा चतुर्थमदनावस्था सूचिता।

**एका चक्रवाकी**[80] – निःसङ्गचक्रवाकवधूः अभिशापहेतोश्चक्रवाकी चक्रवाकात् सायं वियुक्ता भूत्वा प्रभाते पुनस्तेन सह मिलिता भवति। अस्मात् सूच्यते यत्तद्वद-भिशापावध्यनन्तरं यक्षिण्यपि यक्षेण सह अवश्यमेव मेलिष्यति।

**गाढोत्कण्ठा**[81] – प्रबलविरहवेदनायुक्ता। गाढा उत्कण्ठा यस्याः सा। प्रियविरहे या शरीरशोषिणी वेदना जायते सैव उत्कण्ठेति कथ्यते। तद्यथा–

**रागे त्वलब्धविषये वेदना महती तु या।**
**संशोषिणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः॥**[82]



**दिवसगणनातत्परा**[83] – दिवसानामभिशापसमयादवशिष्टदिनानां गणनायां संख्याते तत्परा आसक्ता। अत्र तत्परेति शब्दः आसक्तार्थे प्रयुक्तः। तदुक्तम् - 'तत्परे प्रसितासक्तौ।'[84]

विरहसमये विरहिणी दिवसगणनां कुर्यादिति प्रागेवालोचितम्।

**पञ्जरस्थां शारिकां पृच्छन्ती**[85] – विरहिणी नायिका शुकशारिकादीन् पाठयेदिति प्रागेवालोचितम्। अतो यक्षिण्यपि पञ्जरस्थां मधुरवचनां शारिकां पृच्छन्ती सती कालं गमयतीति सूच्यते।

**प्रथमविरहोदग्रशोका**[86] – प्रथमविच्छेदतीव्रदुःखा। प्रथमविरहेण उदग्रः अतितीव्रः शोको यस्याः सा। अस्मात् सूच्यते यद् यक्षयक्षिण्योर्विरहः प्रथमवारमेव घटितः आसीत्। अतो विरहविषये पूर्वानुभूत्यभावात् तज्जन्यशोको यक्षिण्याः कृते उदग्रः अर्थात् अतितीव्रः असह्यश्चासीत्।

**प्राचीमूले हिमांशोः कलामात्रशेषा तनुः**[87] – पूर्वस्यां दिशि चन्द्रस्य एककलेव क्षीणा। कलामात्रं कला षोडशभाग एव शेषः अवशिष्टो यस्याः सा कलामात्रशेषा। चन्द्रकलेव क्षीणमूर्तिविशिष्टा। अस्मात् ध्वन्यते यद् यथा चन्द्रकला क्षीणापि रमणीया तथा यक्षकान्ता विरहदुःखेन कृशापि सुन्दरी।

**बलिव्याकुला**[88]– बलिषु नित्येषु प्रोषितागमनार्थेषु च देवताराधनेषु व्याकुला व्यापृता। 'सपर्या तर्पणं बलिः[89] इति वचनात् ज्ञायते यद् बलिशब्दोऽत्र पूजार्थे प्रयुक्तः। अस्मात् सूच्यते यद् यक्षस्य प्रत्यागमनाशया यक्षिणी देवताभ्यो बलिप्रदान-परायणासीत्।

**यक्षगोत्राङ्कं विरचितपदं गेयमुद्गातुकामा**[90] – यक्षस्य नामाङ्कितं विरचितपदं गानं गातुमिच्छुका। विरहिणी नायिका विरहसमये प्रियतमस्य स्मृतिसम्बलितं गीतं गायतीति प्रागेवोक्तम्। तेनैव क्रमेण यक्षिणी यक्षनामान्वितं गीतं गायतीति अस्मात् सूच्यते। अत्र गोत्रशब्दः नामार्थे प्रयुक्तः। तदुक्तम्–

**गोत्रं नाम्नि कुलेऽपि च।**[91]

**रात्रौ निर्विनोदा**[92]– निशीथे निर्व्यापारा। रात्रौ किमपि गृहकर्मादिकं करणीयं नास्ति। अतो यक्षिणी तदा निर्विनोदा अर्थात् निर्व्यापारा भवति। व्यापाररहित्यात्तदा विरहस्तामधिकं पीडयतीति अस्मात् सूच्यते।

45. अमरकोषः, 2.6.79
46. वैजयन्तीकोषः 5.4.84
47. मेघदूतम्, 95
48. मेदिनीकोषः
49. मेघदूतम्, 92
50. तत्रैव, 79
51. विश्वकोषः
52. हलायुधकोषः
53. सामुद्रिकशास्त्रे
54. तत्रैव
55. मेघदूतम्, 79
56. उत्पलमालायाम्
57. शब्दकल्पद्रुमः
58. रतिरहस्यम् 4.8
59. मेघदूतम्, 79
60. अमरकोषः, 2.6.74
61. मेघदूतम्, 75 तत्रैव, 85
62. अमरकोषः, 2.6.12
63. तव कृष्ण प्रिया सखी, श्रीमन्महाभारते
अपि च- इत्युक्तौ वै निववृते देवराजस्तया द्विज।
प्राह्व चैनामलं चण्डि सखि खेदातिविस्तरैः।। विष्णुमहापुराणे
64. मेघदूतम्, 85
65. अमरकोषः, 2.6.6
66. हारीतसंहिता,
67. शब्दकल्पद्रुमे उद्धृतम्।
68. मेघदूतम्, 79
69. याज्ञवल्क्यस्मृतिः, 1.84
70. सदर्पकन्दर्पः, 2.99-100
71. गुणपताका, 3.13
72. मेघदूतम्, 85
73. तत्रैव, 85
74. तत्रैव, 86
75. अमरकोषः, 1.7.28
76. वैजयन्तीकोषः, 5.4.84
77. मेघदूतम्, 97
78. शब्दकल्पद्रुमः
79. मेघदूतम्, 85
80. तत्रैव, 80
81. तत्रैव, 80
82. मल्लिनाथेन उद्धृतम्
83. मेघदूतम्, 10
84. अमरकोषः, 3.1.9
85. मेघदूतम्, 82
86. तत्रैव, प्र.14
87. तत्रैव, 86
88. तत्रैव, 82
89. अमरकोषः, 2.7.14
90. मेघदूतम्, 83
91. अमरकोषः
92. तत्रैव, 85
93. तत्रैव, 82
94. तत्रैव, 86
95. तत्रैव, 87
96. वाल्मीकिरामायणम्, 5.16.30
97. मेघदूतम्, 87
98. तत्रैव, 83

❖



# अग्निपुराणोक्तकाव्यलक्षणसमीक्षा

श्यामानन्दमिश्र

सकलसहृदयहृदयाह्लादकारिकाव्यस्य स्वरूपं किं स्यादिति विषयस्त्वद्यावधि जिज्ञासूनां विचारणीय एव। ब्रह्मास्वादाविलक्षणानन्दानुभूतेः कारणीभूतस्य काव्यस्य स्वरूपप्रतिपिपादयिषया भामहादारभ्य अद्य यावत् प्रायः सर्वैरपि काव्यशास्त्रिभिः सयुक्तिकं स्वाभिमतानि काव्यलक्षणानि विनिर्दिष्टानि। समेषामेतेषामाचार्याणां यत् प्रेरणाभूतं तत्तु वस्तुतः अग्निपुराणोक्तं काव्यलक्षणमेवेत्यस्माकं मतिः। उक्तं हि अग्निपुराणे काव्यस्वरूपप्रकाशनजिज्ञासायाम्–

**काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम् इति।**[1]

अत्र लक्षणवाक्ये 'काव्यम्' इति पदं लक्ष्यं शेषो लक्षणम्। लक्षणेऽपि विशेषणदलमेवोपन्यस्तं न विशेष्यम्। अतोऽनन्तरोक्ते "संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली" इत्येतस्मिन् यद् 'वाक्यम्' इति पदं तदेवात्र विशेष्यत्वेन ग्राह्यम्। समीक्षणक्रमे विशेष्यपदस्यैवात्र प्रथमं विचारो विचीयते–

**वाक्य**मिति–अत्र सर्वप्रथमं जिज्ञासा भवति यद् 'वाक्यम्' इति पदेन अग्निपुराणकृत इष्टं शब्दमात्रं वा शब्दार्थयुगलं वेति। यद्यप्यापाततस्त्विदमेव प्रतीयते यद् अग्निपुराणकारमते काव्यशरीरे प्रधानीभूतो वाक्यात्मकः शब्द एव, तथापि सम्यक् पर्यालोचनेनेदमेव प्रतीयते यद् भामहरुद्रटमम्मटभट्टादिवत् 'शब्दार्थौ काव्यम्' इत्यत्र पुराणकृतो विप्रतिपत्तिर्नैव। काव्यपदस्य प्रवृत्तिनिमित्तं भामहमम्मटरुद्र-भट्टादिवत् शब्दार्थयुगल एव न तु जयदेवपण्डितराजजगन्नाथादिवत् शब्दमात्र एव। आस्वादव्यञ्जकत्वस्योभयत्रापि समानवृत्तित्वात् काव्यत्वं शब्दार्थयोरुभयोरपि व्यासक्तं न पुनः शब्दमात्र इति शब्दार्थोभयकाव्यतावादिनां मतम्। शब्दकाव्यतावादिनस्तु आस्वादव्यञ्जकत्वं रमणीयार्थेन समन्विते पदे पदसमूहे वा तिष्ठतीति लक्ष्यतावच्छेदकस्य शब्दमात्रवृत्तित्वमिति प्रतिपादयन्ति। हेमचन्द्रोक्तकाव्यलक्षणनिर्देशपुरस्सरं 'शब्दार्थौ'

इति विशेष्यपदं खण्डयता शब्दमात्रस्य च काव्यत्वं प्रतिपादयता पण्डितराज-जगन्नाथेनोक्तम्–''यत्तु प्राञ्चः 'अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्' इत्याहुः, तत्र विचार्यते–शब्दार्थयुगलं न काव्यशब्दवाच्यं मानाभावात्। 'काव्यमुच्चैः पठ्यते', 'काव्यादर्थोऽवगम्यते', 'काव्यं श्रुतमर्थो न ज्ञातः' इत्यादिविश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थप्रतिपत्तेश्च''[2] इति। अयमभिप्राय–शब्दार्थयोरुभयोरपि काव्यत्वस्वीकरणे अर्थस्यापि काव्यपदबोध्यत्वे सति उक्तलोकव्यवहाराणामनुपपत्तिः स्याद्, अतः शब्दविशेषस्यैव काव्यत्वं सिद्ध्यतीत्यवगन्तव्यम्। परन्त्वत्रेदं विचारणीयं यत् 'काव्यादर्थोऽवगम्यते', 'काव्यं श्रुतमर्थो न ज्ञातः', इत्यादिलोकव्यवहाराणां प्रयोक्ता कः? किं स सहृदयः यस्यानुभवः कविकर्मणः काव्यत्वाकाव्यत्वनिर्धारणे प्रमाणम्? सहृदयत्वं तु पुनः काव्यार्थभावनाक्षमस्यैव ''सहृदयः काव्यतत्त्वार्थविद्'' इति न्यायात्। यस्यार्थावबोधे सामर्थ्यं नास्ति स खलु सहृदय एव भवितुं नार्हति। अतः काव्यत्वनिर्धारणक्षमः सहृदय उक्तलोकव्यवहाराणां प्रयोक्ता नेति विनिश्चितम्। तर्हि किमसहृदयस्योक्तिः काव्यत्वाकाव्यत्वनिर्धारणे प्रमाणम्? नैव। अत उक्तलोकव्यवहारान् प्रमाणरूपेणोपस्थाप्य शब्दमात्रे काव्यत्वनिर्धारणं सर्वथानुचितमेव।

इदमप्यत्र विचारणीयं यत् शब्दमात्रं काव्यपदस्य प्रवृत्तिनिमित्तं यदि स्यान्नार्थस्तर्हि येऽप्यर्थगुणार्थालङ्कारादयः अग्निपुराणे प्रतिपादितास्तेषां शरीरभूतशब्दद्वारेणैव रससम्बन्धो व्यवहितः स्यात्। तथा चार्थालङ्कारादीनां शब्दालङ्काराद्यपेक्षया हीनत्वं सिद्ध्येत्। परं नैतदभिमतं विदुषाम्। उक्तं हि पुराणकृता–

**सुभगङ्करणोऽर्थानामर्थालङ्कार इष्यते।**
**तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्॥**[3]

अतो यद्यर्थालङ्कारं विना शब्दे सौन्दर्यसद्भाव एव न स्वीक्रियते तर्हि का कथा काव्यतायाः। अथ च, उभयालङ्कारप्रतिपादनक्रमेऽपि–

**शब्दार्थयोरलङ्कारो द्वावलङ्कुरुते समम्।**
**एकस्तु निहितो हारः स्तनं ग्रीवामिव स्त्रियाः।**[4] इति।

यदुक्तं तत्रापि उपमेयभूते स्तनग्रीवे यथा शरीरस्थानीये तद्वदेव उपमानभूतौ शब्दार्थावुभावपि काव्यशरीरस्थानीयाविति सुस्पष्टमेव। वस्तुतः काव्याङ्गनिरूपणं प्रतिज्ञायैवार्थालङ्कारादीनां लक्षणग्रन्थेषु प्रतिपादनाल्लक्ष्यतावच्छेदकस्योभववृत्तित्वं न



पुनः शब्दमात्रवृत्तित्वमिति स्थितम्। तदुक्तं महामहोपाध्यायगङ्गाधरशास्त्रिणा–''अत एवार्थगुणानामर्थालङ्काराणामर्थशक्तिमूलकध्वनीनां च निरूपणमुपपद्यते। न च तेषामुत्तमाद्यन्यतमकाव्यपदार्थप्रवेशाभावेऽपि रसोपयोगितामात्रेण निबन्धनमुपपद्य इति वाच्यम्, काव्याङ्गनिरूपणं प्रतिज्ञाय तेषां निरूपणस्यासङ्गत्यापत्तेर्दुस्समाधानत्वाद्''[5] इति।

किञ्च, वाक्यम् इति पदेन शब्दार्थयोरुभयोरपि ग्रहणे साहित्यपर्दणकृतो वचनमपि प्रमाणम्। काव्यं लक्षयता दर्पणकृता 'वाक्यं रसात्मकं काव्यम्' इति यदुक्तं तत्र यद्यप्यापाततस्त्विदमेव प्रतीयते यद् विश्वनाथमते काव्यशरीरे प्रधानीभूतो वाक्यात्मकः शब्द एव, तथापि सम्यक् पर्यालोचनेनेदं सुव्यक्तं भवति यद् भामहरुद्रटमम्मटभट्टादिवत् 'शब्दार्थौ काव्यम्' इत्यत्र ग्रन्थकृतो विप्रतिपत्तिर्नैव। तथा हि मम्मटोक्तं काव्यलक्षणं विस्तरेण दूषयता विश्वनाथेन शब्दार्थयोः सर्वाणि विशेषणानि दोषप्रदर्शनपूर्वकं निरस्तानि, परं विशेष्यभूतस्य शब्दार्थयुगलस्य काव्यशरीरत्वमुचितं न वेत्यत्र न किञ्चिदुक्तं दर्पणकृता। ततश्च परमतमप्रतिषिद्धमनुमतं भवतीति तन्त्रयुक्त्या शब्दार्थयोः काव्यत्वे न विप्रतिपत्तिर्विश्वनाथस्येति प्रतीयते। यदि च शब्दार्थयुगलभिन्नं वाक्यमात्रं काव्यशरीरं विशेषेण निर्दिशतो विश्वनाथस्य न प्रोक्ततन्त्रयुक्तिविषयता काव्यलक्षणप्रसङ्गे मन्यते तथाप्युत्तरग्रन्थेनानेकेन ''रसादीनामर्थाच्छब्दार्थशरीरस्य काव्यस्यात्मभूतानाम्''[6] इत्यादिना दर्पणवचनेनैतदेव सिद्ध्यति यत् साहित्यदर्पणकृतोऽभिमतमेव शब्दार्थयोः काव्यत्वमिति। इत्थमेव साहित्यदर्पणकृत उपजीव्यभूतस्याग्निपुराणकृतोऽपि वाक्यमित्याशयः शब्दार्थयुगलमेवेति स्वीकारे का विप्रतिपत्तिः?

न केवलं शास्त्रकाराणामपितु काव्यकाराणामपि वचनं 'शब्दार्थौ' इत्यस्य लक्ष्यतावच्छेदकत्वे प्रमाणम्। उक्तं हि शिशुपालवधकृता महाकविना माघेन ''शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते''[7] इति। अतः काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोरेवेति स्वीकर्तुं युक्तम्।

विशेष्यपदं विचार्य सम्प्रति विशेषणपदानां क्रमेण विचारः क्रियते–

**स्फुरदलङ्कारमिति**–विशेषणमिदं नीरसे स्फुटालङ्कारविरहिणि शब्दार्थयुगलेऽतिव्याप्तिं वारयितुमुपात्तम्। पुराणकारा एकत्र ''काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते''[8] इति व्याहरन्तः काव्येऽलङ्काराणामवश्यम्भावित्वं यद्वा काव्यघटकत्वं प्रतिपादयन्ति, पुनः अन्यत्र ''गुणालङ्काररहितं न श्रेष्ठं काव्यमित्यतः'' इति

व्याहरन्तः तस्योत्कर्षमात्रकरत्वं निर्दिशन्ति। अस्मन्मते तु अलङ्काराणामुत्कर्षमात्रकरत्वमेवोपपद्यते न पुनः काव्यघटकत्वमिति। यतो हि रसोऽस्ति चेत् काव्यत्वमक्षयमेव। तदुक्तं ध्वनिकृता–"स्वत एव रसानुगुणमर्थविशेषनिबन्धनमलङ्कारविरहेऽपि छायातिशयं पुष्णाति। यथा–मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः। येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ' इत्यादौ। अत्र ह्यद्भूतरसानुगुणमेकचुलके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाति"[९] इति।

काव्येऽलङ्काराणां स्थितिरङ्गाश्रिता भवतीति प्रतिपादितं काव्यशास्त्रिभिः "हारादिवदलङ्काराः", "अङ्गाश्रिता अलङ्काराः"[10] प्रभृतिवचनैः। अङ्गं शब्दार्थौ, तद्द्वारेण रसस्योपकारका अलङ्कारा इत्यवगन्तव्यम्। तत्रानुप्रासादयः शब्दद्वारेणोपमादयश्चार्थद्वारेण रसमुपकुर्वन्तीति। रसोपकारकत्वमलङ्काराणां त्वनियतमेव। तथा हि–इमे रससद्भावे क्वचित् सुन्दरीस्त्रीषु कण्ठहारादिवदुत्कर्षाधायकाः, क्वचित् सत्स्वप्यनुत्कर्षकाः, क्वचिदन्यत्र च रसाभावे कुरूपायां कटककुण्डलादिवद्वाच्यवाचकचारुत्वमात्रपर्यवसिता भवन्ति। तदुक्तं काव्यानुशासने–'ते(षां) च रसस्य सतः क्वचिदुपकारिणः क्वचिदनुपकारिणः। रसाभावे तु वाच्यवाचकवैचित्र्यमात्रपर्यवसिता भवन्ति"[11] इति।

अत्रेदं ध्येयं–यदा हेमचन्द्रादयः काव्येऽलङ्कारमनिवार्यं न मन्यन्ते, शून्यं वासगृहम्' इत्यादावलङ्काराभावेऽपि रससद्भावात् काव्यत्वमङ्गीकुर्वन्ति, तदा काव्यलक्षणेऽलङ्कारनिवेशः कथम्? अत्र च अवरकाव्यस्वरूपनिरूपणावसरे काव्यानुशासनकृतः–"यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया **रसपर्यवसानम्**, तथापि स्फुटस्य रसस्यानुपलम्भादव्यङ्ग्यमेतत् काव्यमुक्तम्"[12] इति वचनेनापि स्पष्टं यदलङ्कारो वर्ततां मा वा वर्तिष्ट रसाभिव्यक्तौ काव्यत्वमक्षतम्। अतः फलितं यत् काव्यलक्षणे 'स्फुरदलङ्कारम्' इत्यनेन अलङ्करनिवेशो न युक्तः, व्यभिचरितस्य पदार्थस्य लक्षणेऽनिवेश्यत्वात्।

**गुणवदिति**–विशेषणमिदं लक्षणस्य निर्गुणे शब्दार्थयुगलेऽतिव्याप्तिनिरासाय न्यस्तम्। माधुर्यादिगुणविशिष्टौ शब्दार्थौ काव्यमिति भावः। माधुर्यादयो यद्यपि साक्षात् काव्यात्मभूतस्य रसस्यैव धर्माः शब्दार्थयोस्तु पुनः उपचारेणैव, रसाभिव्यक्तेः शब्दार्थाश्रितत्वात्, तथापि 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इति व्याहरताप्याग्निपुराणकृता काव्ये गुणानामवश्यम्भावित्वं प्रतिपादयितुमेव लक्षणे शब्दार्थयोर्विशेषणरूपेण 'रसवद्' इत्यस्य स्थाने 'गुणवद्' इति पदमुपात्तम्। तदुक्तं



पुराणकृता–

**अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्।**
**वपुष्यलङ्कृते स्त्रीणां हारो भारायते परम्।।**[13]

काव्ये गुणानामवश्यम्भावित्वं परवर्त्तिभिरप्याचार्यैः स्वीकृतम्। यथाह काव्यानुशासनकृत्–"अनलङ्कृतमपि गुणबहुलं स्वदते। यथोदाहरिष्यमाणं 'शून्यं वासगृहम्' इत्यादि। अलङ्कृतमपि निर्गुणं न स्वदते। यथा–'स्तनकर्परपृष्ठस्था वार्जिनी छदमण्डकाः। वियोगाग्न्युष्मणा पक्वाः कन्दुकिन्येव ते स्त्रिया।। इति।[14] गुणानां नैयत्येन रसोत्कर्षहेतुत्वमन्वयव्यतिरेकाभ्यां रसाश्रयत्वं–रसाव्यभिचारिस्थितित्वं च प्रतिपादयन्नाह काव्यानुशासनकृत्–"रसो वक्ष्यमाणस्वरूपस्तस्योत्कर्षहेतवो गुणाः।... रसाश्रयत्वं च गुणदोषयोरन्वयव्यतिरेकानुविधानात्"[15] इति।

परन्त्वत्रेदं ध्यातव्यं यद् माधुर्यादयो गुणाः काव्यस्य स्वरूपाधायका न, प्रत्युत उत्कर्षमात्राधायकाः। स्वयमग्निपुराणकृतापि स्वीकृतमुत्कर्षाधायकत्वं गुणालङ्कारयोः। उक्तं हि तेनैव–

**अङ्गहीननरो यद्वत्र श्रेष्ठः काव्यमेव तत्।**
**गुणालङ्काररहितं न श्रेष्ठं काव्यमित्यतः।।**

अत्र स्पष्टं गुणालङ्कारयोरुत्कर्षाधायकत्वं, न पुनः स्वरूपाधायकत्वम्। यतो हि गुणालङ्काराहित्ये काव्यस्य श्रेष्ठताया एव निषेधः कृतः अग्निपुराणकृता, न तु काव्यत्वसामान्यस्य। अथ च, वामनोक्तं गुणालङ्कारविवेकं खण्डयता काव्यप्रकाशकृता यदुक्तं "स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी अस्याः रदच्छदरसो न्यक्करोतितरां सुधाम्" इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारस्य प्रवर्तकौ"[16] इति। तत्रापि गुणनिरपेक्षे शब्दार्थयुगले काव्यत्वाङ्गीकारादनुपपन्नं काव्यघटकत्वं गुणानाम्। अत्र प्रदीपकारेण यदुक्तम् **अस्त्येवात्र गुणः तथा ज्ञानं च। परन्तु ... गुणजन्यां शोभामनपेक्ष्यैवालङ्काराभ्यां शोभासम्पत्तिरिति तात्पर्यम्"**[17] इति, तदपि काव्यलक्षणप्रसङ्गे गुणानामन्यथासिद्धावमेवाख्याति। काव्यानुशासनकृता हेमचन्द्रेण यदुक्तं वामनोक्तगुणालङ्कारविवेकस्य खण्डनप्रसङ्गे तदप्यत्र द्रष्टव्यम्। उक्तं हि तेन–**'काव्यशोभायाः कर्तारो धर्माः गुणास्तदतिशयहेतवस्त्वलङ्काराः' इति वामनेन यो विवेकः कृतः सोऽपि व्यभिचारी। तथा हि 'गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः' इत्यादौ प्रसादश्लेषसमतामाधुर्य-**

सौकुमार्यार्थव्यक्तीनां गुणानां सद्भावेऽपि काव्यव्यवहाराप्रवृत्तेः।

अपि काचिच्छ्रुता वार्ता तस्यौन्निद्र्यविधायिनः।
इतीव प्रष्टुमायातेः तस्याः कर्णान्तमीक्षणे॥

इत्युत्प्रेक्षालङ्कारमात्रादविवक्षितत्रिचतुरगुणात् काव्यव्यवहारदर्शनात्[18] इति। एतेनेदं स्पष्टं यत् रसाभावे गुणमात्रस्य सद्भावः काव्यत्वाधायको न, गुणाभावे चालङ्कारमात्रस्य सद्भावोऽपि काव्यव्यवहारस्य प्रवर्तक इति।

रसगङ्गाधरकारोऽपि काव्यलक्षणे गुणालङ्कारादेर्निवेशस्यानौचित्यं प्रतिपादयन्नाह– "लक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः। 'उदितं मण्डलं विधोः' इति (गुणालङ्कारविरहिणि) काव्ये दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरणविधिनिषेध-जीवनाभावादिपरे (व्यङ्ग्यसद्भावे) 'गतोऽस्तमर्कः' इत्यादौ चाव्याप्तेः। न चेदमकाव्यमिति शक्यं वदितुम्। काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात्। काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव, गुणत्वालङ्कारत्वादेरननुगमाच्च"[19] इति। फलतः निर्गुणे शब्दार्थयुगलेऽपि काव्यत्वदर्शनाल्लक्षणस्यातिव्याप्तेरपाकरणमसम्भवमिति विनिश्चितम्।

**दोषवर्जितमिति**–पदमिदं सदोषेऽतिव्याप्तिवारणायोपात्तम्। यद्यपि च्युतसंस्कृत्यादयः साक्षात् रसधर्माः, न तु शब्दार्थयोस्तथापि रसाभिव्यञ्जनस्य शब्दार्थाश्रितत्वात् परम्परया शब्दार्थयोरपीत्यवगन्तव्यम्। यतो हि दोषाः यदि साक्षात् शब्दार्थधर्मा एव स्युस्तर्हि श्रुतिकटुत्वादयो रौद्रबीभात्सादौ अश्लीलत्वादयश्च हास्यादौ गुणस्वरूपा न भवेयुः। दोषपदेनात्र काव्यात्मभूतस्य रसस्यापकर्षकाः च्युतसंस्कृत्यादयः स्फुटदोषा एव ग्राह्याः दोषात्यन्ताभावविशिष्टौ शब्दार्थौ न, तथात्वे सर्वथा दोषराहित्यस्यासम्भवाद् दर्पणकृतः प्रविरलत्वनिर्विषयत्वविषयकस्याक्षेपस्यासमाधेयत्वाच्च। मम्मटभट्टहेमचन्द्रादीनां "मुख्यार्थहतिर्दोषः" "अपकर्षहेतवस्तु दोषाः"[20] इत्यादिवचनानामयमेवाभिप्रायः।

ननु रौद्रवीरादौ श्रुतिकटुत्वादीनां सद्भावेऽपि काव्यत्वस्य सर्वस्वीकृतत्वात् दोषवर्जितावित्यस्य लक्षणेऽव्याप्तिरिति चेन्न, तत्रैतेषामुत्कर्षाधायकत्वात्–गुणस्वरूपत्वात्। अदोषावित्येतेन शृङ्गारादिष्वेव श्रुतिकटुत्वादीनामभावोऽभिप्रेतः, न तु वीरादिषु। 'दोषत्वं ह्युद्देश्यप्रतीतिप्रतिबन्धकत्वम्' इति परिभाषाबलाद् वीरबीभत्सप्रभृतिषु श्रुतिकटुत्वादीनां दोषत्वमेवानुपपन्नम्, एतेषाम् उद्देश्यस्य–रसस्य प्रतीतौ अप्रतिबन्धकत्वात्।



पुराणकृत "उद्वेगजनको दोषः सभ्यानाम्"[21] इत्युक्तेरप्ययमेवाशयः। अनित्या ये श्रुतिकटुत्वादयस्ते क्वचिद्रौद्रवीरादिषूत्कर्षाधायकत्वाद् गुणस्वरूपाः, क्वचिदन्यत्र च शृङ्गारहास्यप्रभृतिष्वपकर्षकत्वाद्दोषस्वरूपाः। फलतः रौद्रवीरादिषु श्रुतिकटुत्वादीनां सद्भावेऽपि दोषरूपेणाग्राह्यत्वाद् 'दोषवर्जितम्' इत्यस्य लक्ष्येऽव्याप्तिसम्भावना निराकृता।

किञ्च दोषवर्जितमित्युक्ते 'न्यक्कारो ह्ययमेव ...' इत्याद्युत्तमकाव्येषु अविमृष्टविधेयांशत्वसद्भावाल्लक्षणस्याव्याप्तेर्यः साहित्यदर्पणकृत आक्षेपः"[22] सोऽप्यविचारित एव, वक्तुरभिप्रायं प्रकाशयितुमविमृष्टविधेयांशस्य गुणरूपत्वात्। वस्तुतः कुम्भकर्णादिवधादनन्तरं रावणस्य नैराश्यादिभावं प्रबलतया प्रकटयितुं वाक्य उद्देश्यविधेययोर्व्युत्क्रमः न दोषः, प्रत्युत गुणस्वरूप एव। अत एवोक्तं काव्यप्रकाशकृता "वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना दोषोऽपि क्वचिद् गुणः"[23] इति। काव्यानुशासनकृतः "वक्त्राद्यौचित्ये (दोषोऽपि) क्वचिद् गुण एव"[24] इति वचनमप्यत्र प्रमाणम्। अतः 'न्यक्कारो ह्ययमेव' इत्यादिष्वविमृष्टविधेयांशत्वस्य सद्भावेऽपि दोषाभावाल्लक्षणस्याव्याप्तिर्नेति विनिश्चतम्।

परन्त्विदमप्यत्र विचार्यं यद् दोषस्य सद्भावे काव्यत्वमस्ति न वेति। अस्मन्मते तु अस्त्येव, क्वचिद् दोषसद्भावेऽपि रसाभिव्यञ्जके शब्दार्थयुगले काव्यत्वस्य सकलसत्कविसम्मततत्वात्। यथा विक्रमोर्वशीये 'हा धिक् सा किल तामसी शशिमुखी दृष्टा मयात्र सा"[25] इत्यादौ 'दिनम्' इति पदे अवाचकत्वदोषदुष्टे सत्यपि विप्रलम्भशृङ्गारव्यञ्जकत्वं केन निवारयितुं शक्यते? यथा वा 'सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे"[26] इत्यादौ व्यभिचारिभावानां स्वशब्दवाचकत्व-रूपदोषस्य सद्भावेऽपि शृङ्गारानुप्राणितो भक्तिरसः केन नानुभूयते? वस्तुतः काव्यमार्गे 'दोषाः काव्यत्वभञ्जकाः' इति मतं नैकान्तिकम्। यदि हि दोषसद्भावेऽपि शब्दार्थयोः स्फुटरसोद्बोधकत्वमस्ति, तर्हि अस्ति काव्यत्वमपि, रसाभिव्यञ्जकयोः शब्दार्थयोरेव काव्यत्वाङ्गीकारात्। दोषास्तु तत्र केवलं काव्यस्योपादेयतातारतम्यमेव विधातुं समर्थाः, न पुनः काव्यत्वमपनेतुमिति। साहित्यदर्पणे यदुक्तं **कीटानुविद्धरत्नादिसाधारण्येन काव्यता, दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट**[27] इति तत्रापि ग्रन्थकारस्यायमेवाशयो यद् रसाद्यनुभवः स्फुटोऽस्ति चेद् दुष्टेऽपि शब्दार्थयुगले काव्यताऽवश्यमेव स्वीकरणीया। अत इदं फलितं यद्

दोषवर्जितमिति विशेषणपदस्य लक्षणे समावेशोऽनुचित एव, दोषसद्भावेऽपि काव्यत्वस्वीकारे व्यतिरेकव्यभिचाराद् व्यभिचरितस्य च पदार्थस्य लक्षणेऽनिवेश्यत्वात्।

इदमत्र निष्पन्नम् – न केवलमुत्तममध्यमयोरपितु अवरे–अव्यङ्ग्येऽपि काव्ये काव्यत्वाधायकत्वं वस्तुतः रसस्यैव न पुनरलङ्काराणामिति। अतः अस्मन्मते 'रसबोधौपायिकविभावादिसंवलितशब्दार्थत्वं काव्यत्वम्' इत्येव काव्यलक्षणं युज्यतेऽथवा 'वाक्यं रसात्मकं काव्यम्' इति विश्वनाथकविराजोक्तलक्षणमेव निर्बाधमिति शिवम्।

❖



## सन्दर्भग्रन्थाः


1. अग्निपुराणे, 337.6
2. रसगङ्गारे (मदनमोहनझाकृतटीकायुते) प्रथम आनने, पृ.15
3. अग्निपुराणे, 344.1
4. अग्निपुराणे, 345.1
5. तत्रैव, पृ.21
6. तत्रैव 9.1 (वृत्तिः)
7. शिशुपालवधे, 2.88
8. अग्निपुराणे, 343.1
9. ध्वन्यालोके, 4.5 (वृत्तिभागः)
10. काव्यप्रकाशे 8.67, काव्यानुशासने, पृ.20
11. तत्रैव, पृ.20
12. तत्रैव, पृ.131
13. अग्निपुराणे, 346.1
14. काव्यानुशासनविवेके, पृ.19
15. काव्यानुशासने, पृ.19
16. काव्यप्रकाशे, उदाहरणक्रमाङ्कः 348 (वृत्तिभागः)
17. तत्रैव, पृ.279
18. काव्यानुशासने, पृ.21
19. रसगङ्गाधरे, पृ.21-22 (रसचन्द्रिकाटीकायुतस्येयं पृष्ठसंख्या)
20. काव्यप्रकाशे, 7.1 काव्यानुशासने, पृ.19

21. अग्निपुराणे, 347.1

22. साहित्यदर्पणे, 1.2 (वृत्त्यंशः)

23. काव्यप्रकाशे सूत्रक्रमाङ्कः 81 (वृत्त्यंशः)

24. काव्यानुशासने, पृ.232

25. काव्यप्रकाशे उदाहरणसंख्या 149

26. तत्रैव उदा. संख्या 321

27. साहित्यदर्पणे प्रथमे परिच्छेदे पृ.12

❖



# अद्वैतवेदान्तदर्शनालोकेन जीवस्य अवस्थात्रयस्वरूपाऽवलोकनम्

डा. मीनाक्षीरायः,
डा. करुणानन्दमुखोपाध्यायः

## 1. भूमिका

ब्रह्माण्डेऽस्मिन् जीवनस्याविर्भावः सर्वाधिकमहत्त्वपूर्णघटना अस्ति। जीवनं यत्र विद्यते स चेतनो जीव इति कथ्यते। एककोशिप्राणित आरभ्य मनुष्यपर्यन्ता अनेकविधा जीवाः सन्ति। अध्ययनेनेदम् अवगतं भवति यत् जडवस्तुवत् चेतनजीवाः एकस्यां स्थितौ सर्वदा न विराजन्ते किन्तु स कदाचित् जागर्ति क्वचिच्च स्वपितीति। तस्य स्वापोऽपि नैकप्रकारः, किन्तु गभीरनिन्द्रास्वप्नभेदेन द्विविध इति प्रत्येकजीवस्य जाग्रत्स्वप्नसुषुप्तिरिति अवस्थात्रयं विद्यते। यद्यपि कवचित् हसति, क्वचित् रोदिति, क्वचित् नृत्यति, क्वचित् गायति इत्यादयः अन्याः अपि अवस्थाः सन्ति जीवस्य इति प्रतिभाति; तथापि हसनरोदनादीनां जाग्रदादिषु अन्तर्भावसम्भवात् जीवस्य तिस्र एव अवस्था इति अद्वैतवेदान्तदर्शने जीवविज्ञाने मनोविज्ञाने च स्वीक्रियते। यद्यपि मनुष्येषु एव एतदवस्थात्रयं प्रत्यक्षादिप्रमाणैः सिद्धं वर्तते, इतरेषु गोमहिषव्याघ्रादिजन्तुषु वृक्षलतादिपादपेषु च जाग्रत्सुषुप्त्यवस्थयोः प्रमाणसिद्धापि तेषां स्वप्नावस्था अस्ति न वा इत्यत्र संशयो विद्यते इति साम्प्रतं तथापि आधुनिकजीववैज्ञानिकैः निरन्तरानुसन्धानेन इदम् अवगतं यत् इतरप्राणिषु अपि स्वप्नावस्था अस्ति। जवाहरलालनेहरुविश्वविद्यालयीय-जीववैज्ञानिकैः प्रोफेसरवीरेन्द्रनाथमल्लिकैरुक्तम्-"However, the cats where the relic Iuder formation was left intact (not damaged) although the specifie sensory fibers were damaged, the animals showed signs of spontaneous wakefulness as well as sleep. .........In such animals electrical stimulation of the reticular formation aroused the animal

and the aroysal lasted for longer duration. Thus, it may be summarised that stimulation of the reticular formation after lesion to the lemniscal pathway induced arousal and dessynchronisation of the contrical EEG."[1]

अस्तु तावत् सर्वेषु जीवेषु जाग्रदाद्यवस्थात्रयं विद्यते, परन्तु मानवमनसि प्रश्नाः उपजायन्ते का नाम अवस्था (जीवानाम्)? सा अवस्था किं जीवादतिरिच्यते? जाग्रदाद्यवस्थाभेदे किं निमित्तम्? तास्वस्थासु जीवः किं सनानमेव अनुभवति? अथवा तस्य अनुभूतौ विलक्षणता आयाति? जाग्रदादिप्रत्येकमवस्थायां जीवस्वरूपे किं परिवर्तनं भवति? जाग्रदाद्यवस्थात्रयाद् भिन्ना अवस्था जीवस्य सम्भवति न वा? निबन्धेऽस्मिन् अद्वैतवेदान्तदर्शनप्रतिपादितां दृष्टिम् अवलम्ब्य एतेषां प्रश्नानां समाधायनाय प्रयासो विधीयते अस्माभिः।

## 2. जीवस्वरूपम्

ब्रह्माण्डीयचेतना सर्वत्र व्याप्ता विद्यते परन्तु सा यदा अन्तःकरणेन परिच्छिन्ना भवति तदा तत्परिच्छिन्नचैतन्यमेव जीवशब्देन अभिधीयते। तात्पर्यमिदमस्ति यत् सर्वव्यापिनी ब्रह्माण्डीयचेतना न जीवशब्दवाच्या, किन्तु अन्तःकरणेन परिच्छिन्न-ब्रह्माण्डीयचेतना एव जीवशब्दावाच्या इति। उदाहरणेन इदं स्पष्टं भवति-अपरिच्छिन्न आकाश एक एव, परन्तु यदा सः घटमठाद्युपाधिना परिच्छिन्नो भवति तदा घटाकाशः मठाकाशः इत्यादिपृथक्परिचितिं लभते, तथैव सर्वव्यापिनी ब्रह्माण्डीयचेतना अन्तःकरणेन परिच्छिन्ना सती जीवो भवति। वस्तुतस्तु यथा घटाभ्यन्तरस्थस्यैव आकाशस्य घटेन परिच्छिन्नत्वम् अतएव घटाभ्यन्तरवर्तिन एव आकाशस्य घटाकाशशब्दवाच्यता, तथैव मध्यमपरिमाणविशिष्टान्तःकरणमध्यवर्तिन एव ब्रह्माण्डीयचैतन्यस्य जीवनामधेयता। उक्तञ्च धर्मराजाध्वरीन्द्रेण, "जीवो नामाऽन्तःकरणावच्छिन्नं चैतन्यम्।"[2]

## 3. जीवस्य उपाधित्रयम्

अन्तःकरणं जीवस्य उपाधिरस्ति, तेनैव च ब्रह्माण्डीयचैतन्यस्य परिचयो भवति जीवरूपेण, तथापि जीवस्यान्तःकरणं न एकमात्रोपाधिः, किन्तु अन्तःकरणस्य कारणीभूता व्यष्ट्यविद्या स्थूलशरीरञ्चेति अन्यदपि अस्त्युपाधिद्वयं जीवस्य। अतएव



स्थूलसूक्ष्मकारणशरीरभेदात् जीवस्य उपाधित्रयं वर्तते इत्यस्ति वेदान्तडिण्डिमः। तत्र व्यष्ट्यविद्या एव कारणशरीरशब्देन उच्यते, अन्तःकरणञ्च सूक्ष्मशरीरमिति। एतदुपाधित्रयेण जीवः सदा न सम्बद्धो भवति, किन्तु स जीवः क्वचित् एकेनो-उपाधिना, क्वचिद् उपाधिद्वयेन, कदाचिच्च उपाधित्रयेण सम्बद्धो भवति। उपाधिसम्बन्धभेदादेव जीवस्यावस्थाभेदाः जायन्ते, तथाहि यदा एकेन उपाधिना कारणशरीराख्यया व्यष्ट्यविद्यया स जीवः सम्बद्धो भवति तदा तस्य सुषुप्त्यवस्था भवति। यदा सः कारणशरीरेण सूक्ष्मशरीरेण च सह सम्बद्धो भवति तदा तस्य स्वप्नावस्था भवति, यदा सः जीवः उपाधित्रयेण कारणसूक्ष्मस्थूलशरीराख्येन सम्बद्धो भवति तदा तस्य जाग्रदवस्था भवति।

## 4. अवस्थास्वरूपम्

यदा चैतन्यं (ब्रह्माण्डीयचेतना) केनचिदुपाधिना असम्बद्धं सत् स्वम् अनुभवति तदा तस्यानुभूतिः केवलात्मविषयिणी भवति, परन्तु यदा चैतन्यं केनचिद् उपाधिना सम्बद्धं सत् स्वम् अनुभवति तदा तस्य अनुभूतौ किञ्चिद्वैलक्षण्यम् आयाति। एतद्विलक्षणानुभवाश्रयतया चैतन्यं जीवभावं भजते। अनुभूतौ या विलक्षणता आयाति सा एव जीवस्य अवस्था इत्युच्यते। प्रकृते च अनुभूतिनिष्ठा सा विलक्षणता स्वात्मव्यतिरिक्तविषयकत्वमेव। यथा जाग्रदवस्थायां स्थूलशरीरात्मकोपाधिना सह सम्बद्धं सत् चैतन्यं जीवभावं प्राप्नुवत् चक्षुरिन्द्रियेण रूपसम्बन्धानन्तरम् अनुभवति - 'अहं रूपं पश्यामि, तदा तस्य स्वानुभूतौ विलक्षणता आयाति, सा च विलक्षणता वस्तुतः अनुभूतौ आत्मविषयकत्वातिरिक्तरूपद्रष्टृत्वविषयकत्वम्। वस्तुतस्तु रूपविषयकचाक्षुषप्रत्यक्षाश्रयाऽभिन्नात्मविषयकाऽनुभव एव जीवस्य (जाग्रद्) अवस्था। आचार्यो मधुसूदनः एतत् स्पष्टीकरोति - "इन्द्रियवृत्तिकालीनाऽर्थोपलम्भो जागरणम्।"[3] समीकरणेन इदं स्पष्टं भवति - (क) केवलात्मविषयकानुभवयुक्तम् = शुद्धं चैतन्यम्। (ख) (आत्मा+रूपद्रष्टृत्व) विषयकानुभवाश्रयः = अवस्थावान् जीवः। (ग) स्वात्मव्यतिरिक्तरूपद्रष्टृत्वविषयकानुभवः = जीवस्यावस्था।

एतदालोचनया इदं स्पष्टं जातं यत् जीवस्य जाग्रदाद्यवस्था जीवाद् भिन्ना अभिन्ना च, यतो हि विलक्षणानुभवः अवस्था, विलक्षणानुभवाश्रयश्च जीवः। आश्रयाद् अनुभवं पृथक्कर्तुं न शक्यते, यावत्कालम् अनुभवस्तिष्ठति तावत्कालं

जीवे एव तिष्ठति। अतएव अनुभवतदाश्रययोः सम्बन्धः तादात्म्यम् इति वेदान्तिनः, समवायः इति नैयायिकाः कथयन्ति। सा च अवस्था त्रिविधा जाग्रत्-स्वप्नसुषुप्तिभेदात्। उक्तञ्च आचार्यधर्मराजाध्वरीन्द्रेण–"स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्।"[4]

## 5. जाग्रदवस्था

जीवस्य सर्वास्ववस्थासु जाग्रद्रवस्था प्रधाना विद्यते, यतो हि जाग्रदवस्थायां जायमानविषयानुभवाहितसंस्कारेणैव स्वप्नावस्थायाम् अनुभूयमानदृश्यानां निर्मितिर्भवति। अथ च जाग्रदवस्थायां जायमानस्मृतिस्वरूपविश्लेषणेनैव सुषुप्त्यवस्थायाम् अनुभूतविषयाणां ज्ञानम् अस्माकं भवति। जाग्रदवस्थायां जीवः स्वं बाह्यव्यावहारिकविषयान् च जानाति। आनन्दगिरिणोक्तम्-"जाग्रदवस्थो हीन्द्रियैरर्थानुपलभते।"[5] अर्थात् चक्षुरादीन्द्रियेण सह विषयसन्निकर्षानन्तरं जायमानान्तःकरणवृत्तिकालीन-विषयोपलब्धिर्जागरितावस्था। डॉ. सर्वपल्लीराधाकृष्णनेन उक्तम्- "In the waking condition, the whole perceptual mechanism is operative, and we apprehend objects by means of the mind and senses."[6]

## 6. जाग्रदवस्थाया वैशिष्ट्यम्

उपर्युक्तपरिभाषाद्वयविश्लेषणेन जाग्रदवस्थायाः कानिचिद् वैशिष्ट्यानि अवगम्यन्ते। तथाहि–

**(क) प्रथमं तावत्–इन्द्रियाणां क्रियाशीलता–**जाग्रदवस्थायां चक्षुरादि-ज्ञानेन्द्रियाणि वागादिकर्मेन्द्रियाणि च पूर्णरूपेण क्रियाशीलानि भवन्ति। तदानीं जीवः चक्षुरादिज्ञानेन्द्रियैः रूपरसादिविषयान् अनुभवति, वागादिकर्मेन्द्रियैः वचनादि-व्यवहारञ्च करोति। यद्यपि स्वप्नेऽपि हस्तपादादिकर्मेन्द्रियाणां सक्रियता अनुभूयते तथापि स्वप्ने इच्छापूर्वकहस्तपादादिसञ्चालनं नैव क्रियते केनापि। इच्छायाः विद्यमानत्वे स्वप्न एव नाविर्भवति। ज्ञानेन्द्रियाणि तु पूर्णरूपेण निष्क्रियाणि एव तिष्ठन्ति स्वप्ने। वस्तुतः इन्द्रियाणां सक्रियतानिष्क्रियताभ्याम् एव जागृतेः स्वप्नसुषुप्तितो भेदो भवति। आचार्यधर्मराजाध्वरीन्द्रेण उक्तम्–"तत्र जाग्रदवस्था नाम इन्द्रियज्ञानावस्था।"[7]

**(ख) द्वितीयं तावद् जीवस्य स्थूलशरीरसम्बद्धता–**प्रत्येकजीवस्य



कारणशरीर–सूक्ष्मशरीर–स्थूलशरीरभेदैः उपाधित्रयं विद्यते। मायायाः यदेकदेशस्य परिणामः अन्तःकरणरूपेण भवति सः मायैकदेशः व्यष्ट्यविद्याऽपरनामधेयो वा जीवस्य कारणशरीराख्यः प्रथमोपाधिः। ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकप्राणमनोबुद्धीनां समाहारः सूक्ष्मशरीर इत्यभिधीयते। स्थूलपञ्चमहाभूतसमवायेन स्थूलशरीरस्य निर्मितिर्भवति। जाग्रदवस्थायां जीवः एतदुपाधित्रयेण सम्बद्धो भवति। सूक्ष्मशरीरेण सह जीवस्य सम्बद्धता स्वप्नेऽपि अस्ति, कारणशरीरसम्बद्धता स्वप्नसुषुप्त्योरपि विद्यते, परन्तु स्थूलशरीरेण सह जीवस्य सम्बद्धता तु जागृतौ एव भवति इत्यतः स्थूलशरीरसम्बद्धता जाग्रदवस्थाया वैशिष्ट्यम्। आचार्यरामतीर्थेनोक्तम्–"जाग्रदवस्थायायां तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः।"[8]

## 7. जाग्रदवस्थायाम् अनुभूतविषयाणां वैलक्षण्यम्

एकस्यैव जीवस्य जाग्रत्स्वप्नसुषुप्तयः इति अवस्थात्रयम् अस्ति। एतासु अवस्थासु उपाधितारतम्यादेव जीवस्य विषयग्रहणसामर्थ्येऽपि विभिन्नता आयाति। स्थूलशरीरेण सम्बद्धः सन् जीवः जाग्रदवस्थायां यान् विषयान् अनुभवति, स्वप्ने स्थूलशरीरोपाधिसम्बन्धविरहात् ते विषयाः जीवस्य ज्ञानविषयतां नाधिगच्छन्ति। एवं कारणशरीरमात्रसम्बन्धात् सुषुप्तौ जीवस्य अनुभूतविषयाः जाग्रत्स्वप्नयोरनुभूतविषयाद् विलक्षणा एव भवन्ति। जाग्रदवस्थायाम् अनुभूतविषयाणां स्वरूपविश्लेषणेन एतानि वैलक्षण्यानि उपलभ्यन्ते। तथाहि–

**(क) प्रथमतः स्थायित्वम्–**जाग्रदवस्थायाम् अनुभूतविषयाः स्थायिनो भवन्ति। जाग्रद्विषयाः कालान्तरेष्वपि प्रतीतिविषयीभवितुं योग्याः भवन्ति, एतदेव एतेषां स्थायित्वम्। तथाहि कश्चन पुरुषः शयनात्पूर्वं स्वीयकक्षायां जलपूर्णघटम् आसनादिकञ्च स्वस्वस्थाने स्थितं पश्यति, निद्रातः उत्थितः सन्नपि सः तानि वस्तुनि तत्रैव स्थितान्येवानुपश्यति, इदमेव जाग्रद्विषयाणां स्थिरत्वम्। आचार्यरामकृष्णेन उक्तम्–"जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्थायि, कालान्तरेऽपि द्रष्टुं योग्यत्वात्।"[9]

**(ख) द्वितीयतः सार्वजनीनता–**जाग्रदवस्थायाम् अनुभूतविषयाः सार्वजनीनाः भवन्ति। अस्याम् अवस्थायां दृश्यमानं वस्तु यथा एकेन पुरुषेण प्रत्यक्षीक्रियते तथैव अन्येऽपि तद् प्रत्यक्षीकुर्वन्ति। दृष्टान्तेन इदं स्पष्टं भवति–देवदत्तनामकः पुरुषः

काश्मीरं गत्वा 'डल'नात्मकं ह्रदं पश्यति, स च ह्रदः न केवलं तेनैव प्रत्यक्षीभूयते परन्तु तत्रत्याः सर्वेऽपि जनाः तं ह्रदं प्रत्यक्षीकुर्वन्ति, तथा च समानरूपेण सर्वजनग्राह्यतया डलह्रदादयः जाग्रदनुभूतविषयाः सार्वजनीना इति। आचार्यमधुसूदनेन उक्तम्–"स हि कर्तेति च जीवकर्तृत्वश्रुतेः आकाशादिप्रपञ्चवत् सर्व-साधारण्यापत्तेश्च....।"[10]

**(ग) तृतीयतः इन्द्रियग्राह्यता–**जागरे अनुभूतविषयाः इन्द्रियग्राह्याः भवन्ति। इन्द्रियग्राह्यता नाम इन्द्रियेण सह सम्बद्धः सन् वस्तुनः ज्ञानविषयभावप्राप्तिः। यद्यपि जाग्रदवस्थायाम् अनुभूताः सर्वे विषयाः इन्द्रियग्राह्या न भवन्ति, यथा वह्न्याद्यनुमितविषयाः स्वर्गादिशाब्दबोधविषयाश्च नेन्द्रियग्राह्याः, तथापि जागरे एव अनुभूतविषयाः इन्द्रियग्राह्या भवन्ति इति न दोषः। स्वप्ने सुषुतौ वा इन्द्रियाभावात् तदवस्थयोः अनुभूतविषयेषु इन्द्रियग्राह्यता न भवति। आचार्यश्रीरामकृष्णेनोक्तम्–"इन्द्रियैरर्थोपलब्धिर्जागरितम्।"

**(घ) चतुर्थतः व्यवस्थितता–**जाग्रदवस्थायाम् अनुभूतविषयेषु एका व्यवस्था दृश्यते। शब्दान्तरेण वक्तुं शक्यते–यत् जाग्रद्विषयाः कार्यकारणसम्बन्धेन सम्बद्धाः भवति। ते विषयाः झटिति अनुभवविषयतां नाधिरोहन्ति, किन्तु ते विषयाः प्रथमं कार्यकारणसम्बन्धिन्या क्रियया अस्तित्वं लभन्ते, पश्चाच्च ते चक्षुरादीन्द्रियेण सम्बद्धाः सन्तः अनुभवविषयताम् अधिगच्छन्ति। यथा जागरे कश्चन वृक्षः अकस्मात् नोत्पद्यते न वा अनुभवविषयतां गच्छति, किन्तु प्रथमं स बीजरूपेण शकले तिष्ठति, मृत्तिकायां निक्षिप्ते सति जलसेचनादिक्रियायां संजातायां किञ्चित्समयानन्तरं स बीजोऽङ्कुरितो भवति, ततः क्रमशः तस्मिन् पत्राणि प्रादुर्भवन्ति विकासक्रमेण स वृक्षो भवति। तदनन्तरं चक्षुरादीन्द्रियैः सम्बद्धः सन् ज्ञानविषयताम् अधिरोहति। इयमेव व्यवस्थितता जाग्रद्विषयाणाम्।

एवंरीत्या जाग्रद्विषयाः सर्वजनसाधारणाः, इन्द्रियग्राह्याः, कार्यकारणसम्बन्धेन सम्बद्धाः सन्तः व्यावहारिका इति कथ्यन्ते। एतद्वस्तुभिः अभिज्ञाभिवदनादिव्यवहारः निष्पद्यते तस्मात्ते व्यावहारिका इतिं अभिधीयन्ते।

## 8. स्वप्नावस्था

स्वप्नावस्था जीवस्य द्वितीयावस्थास्ति। सा च जाग्रत्सुषुप्त्योः मध्यवर्तिनी



अवस्था अस्ति। जाग्रदवस्थायां निरन्तरं नानाविधकर्माचरणेन शरीरादयः परिश्रान्ता भवन्ति, तस्मात् जीवस्य कृते विश्रान्तेरावश्यकता भवति, तदर्थं स जीवो निद्राम् आश्रयते। गभीराऽगभीरभेदाभ्यां निद्रा द्विविधा भवति, तयोः गभीरनिद्रा सुषुप्तिः अगभीरनिद्रा च स्वप्न इति कथ्यते। श्रीरामकृष्णेन स्वप्नस्य लक्षणमेवम् उक्तम्–"करणेषु उपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः।"[12] अर्थात् चक्षुरादीन्द्रियाणि यदा उपरतानि भूत्वा अन्तःकरणे विलीनानि भवन्ति, तदा जाग्रदनुभवजन्यसंस्कारैः उत्पन्नः गजाश्वरथादिविषयकः प्रत्यय एव जीवस्य स्वप्नावस्था इति। डॉ. सर्वपल्लीराधाकृष्णन् स्वप्नं परिभाषते–

"In dream states, the senses are at rest and only the Manas is active. Through the impressions left on the senses by the waking condition, it knows objects."[13]

## 9. स्वप्नावस्थाया वैशिष्ट्यम्

जाग्रदवस्थेव स्वप्नावस्थायाः स्वरूपविश्लेषणेनापि कानिचिद् वैशिष्ट्यानि उपलभ्यन्ते। तानि च निम्नरूपाणि–

**(क) स्वप्नावस्थायाम् इन्द्रियाणां निष्क्रियता–**स्वप्ने चक्षुरादीन्द्रियाणि निष्क्रियाण्येवावतिष्ठन्ते। जागरे विविधविषयाणां निरन्तरग्रहणेन इन्द्रियाणि परिश्रान्तानि सन्ति विषयग्रहणात्मकं स्वस्वव्यापारं परित्यज्य मनसि लीयन्ते। एतदेव इन्द्रियाणां निष्क्रियता। तथा च श्रुतिः–"परे देवे मनस्येकीभवति।"[14] एतन्मन्त्रव्याख्यानावसरे आद्यशङ्कराचार्यः कथयति–"परे प्रकृष्टे देवे द्योतनवति मनसि चक्षुरादिदेवानां मनस्तन्त्रत्वात्परो देवो मनस्तस्मिन् स्वप्नकाले एकीभवति।"[15]

**(ख) सवासनाऽन्तःकरणेन विविधविषयाणां प्रतीतिः–**जागरे जायमाना विविधविषयिणी अनुभूतिः मनसि स्वविषयकसंस्कारम् आधत्ते, तैश्च संस्कारैः मनः स्वप्ने चन्द्रसूर्यनक्षत्रनीहारिकाश्वरथादिविविधविषयाकारेण परिणमति, साक्षिचैतन्येन तद्विषयाणां प्रकाशो भवति। एतदेव स्वप्नकालीनोऽनुभवः। जागरेऽपि अनुभूतविषयाणां संस्कारो मनसि तिष्ठति, परन्तु तदानीं सक्रियैरिन्द्रियैः निरन्तरं बाह्यरूपरसादि-विषयानुभवाः जायन्ते, ततस्तस्मिन् काले मनसि विद्यमानाः संस्काराः उद्बुद्धीभवितुं नार्हन्ति, स्वप्ने तु सक्रियाणामिन्द्रियाणाम् अभावात् अनायासेनैव ते संस्काराः

उद्बुद्धाः भवन्ति, फलतः बाह्यविषयाणाम् अभावेऽपि तेषाम् उद्बुद्धसंस्काराणां साहाय्येन मनः चन्द्रसूर्यादिविविधविषयरूपेण प्रतीयते। आचार्यः शङ्करः एतत् स्पष्टीकरोति–"जाग्रत्प्रज्ञा अनेकसाधना बहिर्विषयेवावभासमाना मनःस्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते। तन्मनस्तथासंस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षम् अविद्याकामकर्मभिः प्रेर्यमानं जाग्रद्वदवभासते।"[16]

**(ग) स्वप्ने सूक्ष्मशरीरं जीवस्योपाधिः**–दैनन्दिनजाग्रद्भोगजनककर्मक्षये निद्राख्यया तामस्या वृत्त्या स्थूलदेहाभिमाने दूरीकृते च सति जीवस्य स्वप्नावस्था भवति। तदानीं जीवस्य प्रमुख उपाधिर्भवति सूक्ष्मशरीरम्। यद्यपि स्वप्नावस्थायां जीवोपाधिरूपेण कारणशरीरमपि विद्यते, तथापि कारणशरीरस्योपाधिरूपेण अवस्थितिः जाग्रत्सुषुप्त्योरपि भवति, अतः कारणशरीरं जाग्रत्स्वप्नसुषुप्तीनां कृते साधारण उपाधिर्नत्वसाधारण इति ध्येयम्। आचार्यो रामतीर्थः कथयति–"स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरम् उपाधिः।[17]

## 10. स्वप्नेऽनुभूतविषयाणां विलक्षणता

स्वप्नावस्थायाम् अनुभूतविषयेषु कानिचिद् वैलक्षण्यानि उपलभ्यन्ते। तानि च–

**(क) प्रथमतोस्थिरता**–स्वप्नेऽनुभूतविषया अस्थिरा भवन्ति। एतेषां विषयाणां सत्ता प्रातिभासिकी भवति। स्वप्नेऽनुभूतविषयाः स्वप्ने एवम् अनुभूयन्ते, स्वप्नावस्थातः जागरणे सति ते बाध्यन्ते, पुनः स्वप्नावस्थायां गतायामपि ते पूर्वस्वप्नदृष्टविषया नानुभूयन्ते। एतदेव एतेषाम् अस्थिरत्वम्। आचार्यरामकृष्णेन उक्तम्–"स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं न स्थायि, प्रतीतिमात्रशरीरत्वात्।"[18]

**(ख) द्वितीयतः स्वप्नेऽनुभूतविषयाः प्रतिव्यक्ति विभिन्नाः**–स्वप्ने कश्चन पुरुषः किमपि रथादिकं वस्तु पश्यति, तान् विषयान् अन्यः पुरुषः द्रष्टुं समर्थो न भवति, यतो हि जाग्रदनुभवजन्यवासना प्रत्येकपुरुषीयस्वप्नदृश्यानां निर्मितौ निमित्तं भवति। वासनानां प्रतिव्यक्ति भिन्नत्वेन प्रथमव्यक्तिद्वारा स्वप्ने अनुभूयमानं वस्तु अपरेण द्रष्टुं न शक्यते। आचार्यमधुसूदनेन उक्तम्–"प्रतिजीवं स्वप्नाध्यासाऽसाधारण्यं तु मनोगतवासनानाम् असाधारण्यादेव।"[19]

**(ग) स्वप्नविषायाणां प्रत्यक्षत्वेऽपि नेन्द्रियग्राह्यता**–यावत्कालम्



इन्द्रियाणि स्वस्वविषयग्रहणात्मकं कार्यं कुर्वन्ति तावत् स्वप्नो न सम्भवति। देवतानुग्रहाभावाद् इन्द्रियेषु निर्व्यापारतया मनसि लीनेषु सत्सु एव स्वप्न आविर्भवति, तस्मात् स्वप्ने अनुभूतविषयाणाम् इन्द्रियग्राह्यता कथमपि न सम्भवति। आचार्यमधुसूदनः एतत् स्पष्टं करोति–"तत्र चान्तःकरणगतवासनानिमित्त इन्द्रियवृत्त्यभावकालीनोऽर्थोपलम्भः स्वप्नः।"[20] इन्द्रियग्राह्यत्वाभावे स्वप्नविषयाणां प्रत्यक्षत्वं कथं सम्भवति इति चेत्? साक्षिभाष्यत्वादिति ब्रूमः। यथा सुखादीनाम् इन्द्रियग्राह्यत्वाभावेऽपि साक्षिभाष्यत्वेन प्रत्यक्षत्वं तथैव स्वप्नीयविषयाणामपि इति ध्येयम्। स्वप्नविषयाणां साक्षिभाष्यतां दर्शयति च श्रुतिः–"अत्रायं पुरुषः स्वयं ज्योतिर्भवति।।"[21]

**(घ) स्वप्नविषयाः कार्यकारणसम्बन्धेन सम्बद्धाः न भवन्ति**–स्वप्ने अमुभूतविषयाः कार्यकारणनियमेन नियमिता न भवन्ति। अस्यां स्थितौ अनुभूतविषयेषु क्रमानुसारिता न दृश्यते, तथाहि स्वप्ने कदाचित् नद्यां सन्तरन्तं माम् अनुभवामि, झटिति च मां पर्वतशिखरे स्थितं पश्यामि, क्षणादूर्ध्वं मन्दिरं पश्यामि, पश्चाच्च मन्दिरस्य स्थाने स्वगृहं पश्यामि। एताः सर्वा अपि क्रियाः त्वरितं घटन्ते, तासु कापि नियमानुसारिता नानुभूयते। व्यावहारिककारणाभावेऽपि एतेषां दृश्यानां निर्मितिर्भवति। आचार्यरामतीर्थेनोक्तम्–"तक्षदारुमृदाद्यभावेऽप्यकस्मादेव प्रासादादेर्निष्पत्ति-दर्शनात्।"[22]

## 11. सुषुप्त्यवस्था

जीवस्य तृतीयावस्था अस्ति सुषुप्तिः। सामान्यतः गाढनिद्रा एव सुषुप्तिशब्देनोच्यते। एतस्यां स्थितौ इन्द्रियसहितं मनः स्वकारणेऽविद्यायां लीयते। सुषुप्तौ जीवः किमपि वस्तु न कामयते, न वा स्वप्नं पश्यति। तदानीं बाह्यान्तःकरणानाम् अनुपस्थितिवशात् जीवस्य जाग्रद्वद् बाह्यस्थूलविषयाणां ज्ञानं यथा न भवति तथैव स्वप्नान्तरिकविषयाणामपि ज्ञानं न भवति। श्रुतिः सुषुप्तिलक्षणं प्रतिपादयाति–"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्।"[23] आचार्य-सर्वपल्लीराधाकृष्णन् सुषुप्तिस्वरूपं वदति–"In the state of deep sleep the mind and the senses are at rest and the soul is, as it were dissolved in its own self and regains it true nature."[24]

## 12. सुषुप्त्यवस्थायाः वैशिष्ट्यम्

सुषुप्तेः स्वरूपविश्लेषणेन कानिचिद् वैशिष्ट्यानि उपलभ्यन्ते तानि जाग्रत्स्वप्नयोः नैव उपलभ्यन्ते। तथाहि–

**( क ) अन्तःकरणस्य विलयावस्था सुषुप्तिः**—यावत्कालम् अन्तःकरणं क्रियाशीलं वर्तते तावत्पर्यन्तं सुषुप्तिर्नैव भवति, यदा अन्तःकरणं स्वकारणे अविद्यायां लीनं भवति तदैव सुषुप्तिः आविर्भवति। प्रश्नोऽयम् उदेति यत् किं सुषुप्तिकाले परिपूर्णम् अन्तःकरणम् स्वकारणे अविद्यायां लीनं भवति? अथवा किंचिदंशं विहाय? समाधानमेवमंस्ति यत् सुषुप्तिकाले ज्ञानशक्तिविशिष्टान्तःकरणस्यैव लयोऽविद्यायां भवति न तु क्रियाशक्तिविशिष्टान्तःकरणस्य। अन्यथा ज्ञानक्रियोभयशक्तिविशिष्टान्तःकरणस्य अविद्यायां लये सति शरीरे प्राणादिसंचालनाभावेन सुषुप्तिकाले मरणमापतेत् जीवः। अनुभूयते च अस्माभिर्यत् (अपरस्य जनस्य) सुषुप्तिकाले प्राणादिक्रिया प्रचलत्येव। प्रकाशात्मयतिना इदम् अभिहितम्–"प्राणलक्षणक्रियाशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्प्यताम् सांशत्वादन्तःकरणस्य।"[25]

अयमाशयः–विज्ञानशक्तिक्रियाशक्तिभेदेन अन्तःकरणस्य द्वैविध्यम् अद्वैतवेदान्तदर्शनाभिमतम्। तत्र विज्ञानशक्तिविशिष्टान्तःकरणेन बाह्यपुष्पादिविषयाणाम् आन्तरसुखादिविषयाणाञ्च ज्ञानं भवति, उत्पन्नज्ञानानां तद्विषयाणाञ्च सत्यत्वासत्यत्वनिर्धारणम् आत्मादीनाम् अनुसन्धानञ्च भवति। एतत्कार्यचतुष्टयं मनसि निधाय विज्ञानशक्तिविशिष्टस्यान्तःकरणस्य वृत्तिभेदेन मनोबुद्धिचित्ताहङ्कार इति चातुर्विध्यम् अङ्गीक्रियते अद्वैतवेदान्तदर्शने। सुषुप्तौ एतद्वृत्तिचतुष्टयविशिष्टविज्ञानशक्तिमतोऽन्तःकरणस्य लयो भवत्यविद्यायाम्। तस्मात्तदानीं जीव्य बाह्यान्तरविषयान् न जानाति। क्रियाशक्तिविशिष्टान्तःकरणस्यैव प्राण इत्यस्ति नामान्तरम्, तत्तु सुषुप्तौ स्वकार्यं करोत्येवेति न कोऽपि दोषः।

**( ख ) कारणशरीरमात्रम् उपाधिः**—सुषुप्त्यवस्थायां कारणशरीरमात्रमस्ति जीवस्योपाधिः। यद्यपि कारणशरीरम् अन्यजाग्रदाद्यवस्थायामपि जीवस्योपाधिर्भवति, तथापि जाग्रदवस्थायां जीवोपाधिरूपेणातिरिक्ते सूक्ष्मस्थूलशरीरे विद्येते, स्वप्ने च सूक्ष्मशरीरमपि भवति जीवस्योपाधिः, सुषुप्तौ तु कारणशरीरमात्रमेव जीवोपाधिरूपेण वर्तते, अत एवोच्यते सुषुप्तौ कारणशरीरमुपाधिः। वस्तुतः जीवात्मना सह स्थूल-



सूक्ष्मशरीराभ्यां सम्बन्धः अविद्याया विक्षेपशक्तेः कार्यमस्ति। यस्मात् सुषुप्तौ अविद्यायाः विक्षेपशक्तिः कार्यं न करोति तस्मात् तदानीं जीवात्मना सह स्थूलसूक्ष्मशरीरयोः सम्बन्धो न सम्भवति। अतएव कारणशरीराख्यम् अज्ञानमेव सुषुप्तौ जीवस्य उपाधिरित्युक्तम्। श्रीरामतीर्थेन एतदभिहितम्–"सुषुप्तौ बुद्ध्यादिसंस्कारोपरञ्जितमज्ञानमात्रम् उपाधिः।"[26]

**( ग ) परमात्मना सह जीवस्याभिन्नत्वप्राप्तिः**—परमात्मा एव अन्तःकरणेन परिच्छिन्नः सन् जीवभावं भजते। सुषुप्तौ यदा अन्तःकरणं स्वकारणे अविद्यायां लीनं भवति, तदा परिच्छिन्नताप्राप्तिहेतोरभावाद् जीवः परमात्मना सह एकीभवति। यथा कस्यचन पुरुषस्य सम्मुखे दर्पणोऽस्ति चेत् तदा दर्पणे तस्य पुरुषस्य प्रतिबिम्बनिर्माणं भवति, पुरुषश्च तदानीं बिम्बो भवति, पुरुषश्च तदानीं प्रतिबिम्बो भवति, एवंरीत्या दर्पणसान्निध्ये एक एव पुरुषः बिम्बपुरुषः प्रतिबिम्बपुरुषः इति द्विधा व्यवह्रियते। दर्पणापसारणे दर्पणस्थप्रतिबिम्बभूतपुरुषः बिम्बभूतपुरुषेण सह एकतां लभते; तथैव दर्पणस्थानीयस्य अन्तःकरणस्य अभावे सुषुप्तौ प्रतिबिम्बभूतो जीवो बिम्बभूतेन परमात्मना सह ऐक्यं प्राप्नोति। श्रुतिरेतत्प्रमाणयति–"यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति।"[27]

अत्र एकः प्रश्न उदेति यत् सुषुप्तौ एव यदि जीवः सत्स्वरूपपरमात्मना सह ऐक्यं लभते तर्हि मोक्षे सुषुप्तौ च को भेदः? अत्र समाधीयते–यद्यपि सुषुप्तौ जीवः ब्रह्मणा सह एकतां प्राप्नोति तथापि अविद्यायाः आवरणशक्तेः विद्यमानतायां जीवः ब्रह्मैक्यं लभमानोऽपि न जानाति। मोक्षे त्वद्वैतब्रह्मसाक्षात्कारेण अविद्याया निवृत्तौ सत्यां जीवो ब्रह्मस्वरूपतां प्राप्नोति जानाति चेत्यस्ति तयोर्भेदः।

## 13. सुषुप्तौ अनुभव्या विषयाः

सुषुप्तौ चेतनजीवस्य ज्ञानं भवति न वा? इत्यस्मिन् विषये दार्शनिकानां मध्ये मतभेदो दृश्यते। यथा नैयायिकाः मन्यन्ते–सुषुप्तौ ज्ञानं न भवति, ज्ञानसाधनस्य क्रियाशीलमनसः तदानीम् अभावात्। परन्तु अद्वैतवेदान्तिनः सुषुप्तावपि ज्ञानम् अभ्युपगच्छन्ति। एतन्मते सुषुप्तौ मनसोऽभावेऽपि अविद्यया जीवस्य ज्ञानं भवति। तेषामयमाशयः–सुषुप्तितः जागरिते सति "सुखमहस्वाप्सम्, न किंचिदवेदिषम्" इत्याकारकं स्मरणं भवति। जाग्रत्कालीनेनैतत्स्मरणेनानुमानं भवति यत् सुषुप्तौ

जीवात्मनः ज्ञानं भवति, यतो हि व्याप्तिरियं प्रसिद्धा वर्तते–"या या स्मृतिः सा सा अनुभवपूर्विके"ति।

**(क) सुषप्तौ अविद्यावृत्तेरङ्गीकारस्यावश्यकता–**"सुखमहमस्वाप्सम्, न किंचिदवेदिषम्" इति स्मृतिस्वरूपविश्लेषणेन त्रयः स्मरणविषयाः प्राप्यन्ते, आत्मा, अज्ञानं सुखञ्चेति। अनुभवाऽभावे स्मरणं न सम्भवति इति नियमानुसारेण वक्तव्यं यत् यस्मात् सुषुप्तितो जागरणे आत्माऽज्ञानसुखानि स्मर्यन्ते तस्मात् सुषुप्तौ एवत्त्रयम् अनुभूयते स्म। अनया रीत्या सुषुप्तौ त्रयोऽनुभवविषयाः प्राप्यन्ते। सुषुप्तौ अन्तःकरणं स्वकारणे अविद्यायां विलीनं भवति, तस्मात् तदानीम् आत्माद्याकारेण अन्तःकरणवृत्तिर्न सम्भवति, वृत्त्यभावे च संस्कारनिर्मितिर्न सम्भवति, संस्काराभावे च स्मृतिर्नेदेति। यस्माज्जागरिते आत्मादिविषयकं स्मरणं भवति, तस्मात् सुषुप्तौ आत्मादिविषयकः संस्कार उत्पन्नोऽभूत् तथा सति आत्मादिविषयिणी वृत्तिरपि अजायत इति वक्तव्यम्। अन्तःकरणञ्च सुषुप्तौ न विद्यते, अत एव अद्वैतवेदान्तिभिः स्मृत्युपपत्तये सुषुप्तौ आत्मादिविषयिणी अविद्यावृत्तिरङ्गीकृता।

इदमत्र अवधातव्यम् यत् आत्मा–अज्ञान–सुखादिविषयकाऽविद्यावृत्तेरङ्गीकारेऽपि अविद्यायाः एका आत्मादिविषयिणी विशिष्टवृत्तिः नाङ्गीक्रियते, सुषुप्त्यभावप्रसङ्गात्, किन्तु आत्माकारं सुखाकारम् अज्ञानाकारं चेत्यविद्याया वृत्तित्रयं सुषुप्तौ अभ्युपेयते। एतासु तिसृषु वृत्तिषु चैतन्यं प्रतिबिम्बितं सत् तान् सुखादिविषयान् प्रकाशते। आचार्यप्रकाशात्मयतिना एतदभिहितम्–"अज्ञानगतचैतन्याभासजन्मोपाधित्वाद् अज्ञान-सुखसाक्षिविकल्पानुभवस्य अज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात्।"[28] विवरणस्थैतद्वाक्यव्याख्यानावसरे अखण्डानन्दमुनिः कथयति–"अज्ञानं स्वसुखसाक्ष्याकारेण परिणमते, तत्र च परिणताऽज्ञाने चैतन्याभास उपजायते तस्माच्च अज्ञानादि-विक्षेपानुभव इत्यर्थः।"[29]

**(ख) सुषुप्तौ अनुभव्यः प्रथमविषयः आत्मा–**सुषुप्तौ आत्मविषयिणी अनुभूतिर्भवति इति अस्माभिः प्रतिपादितम्। इदानीं प्रश्नोऽयम् उदेति यत् किं सुषुप्तौ शुद्धस्य अखण्डसच्चिदानन्दस्वरूपस्य आत्मनोऽनुभूतिर्भवति? अद्वैत-वेदान्तानुसारेणास्य प्रश्नस्य इदं समाधानं वर्तते–सुषुप्तौ शुद्ध आत्मा नानुभूयते, तत्त्वमस्यादिवाक्येन निर्विकल्पसमाधौ एव शुद्धाऽखण्डस्य आत्मनोऽनुभूतिभर्वति।



अन्तःकरणस्याभावात् सुषुप्तौ यथा परिच्छन्नरूपेण आत्मनोऽनुभूतिर्न भवति, तथैवाविद्याया आवरणशक्तेर्विद्यमानत्वात् आत्मनः शुद्धम् अखण्डस्वरूपमपि नानुभूयते किन्तु आत्ममात्रम् अनुभूयते। वस्तुतस्तु सुषुप्तौ विक्षेपहेतोरनुपस्थितिवशात् आत्मा परिच्छिन्नरूपेण स्वं नैव जानाति, अविद्याया आवरणशक्तेर्विद्यमानत्वाच्च तत्प्रभावात् स्वरूपतो ब्रह्माऽभिन्नत्वेऽपि आत्मा स्वीयब्रह्मस्वरूपतां नैव जानाति, किन्तु आत्मा स्वीयमस्तित्वस्वरूपं जानाति। इदमेवाद्वैतवेदान्तदर्शने अज्ञानोपहित आत्मा इति कथ्यते। अज्ञानोपहित आत्मा एव अविद्यावृत्तेर्विषयो भवति। अज्ञानोपहित आत्मा एवं साक्षिशब्देन भाष्यते। तस्मात् साक्षिपदवाच्योऽज्ञानोपहित आत्मा एव सुषुप्तिकालीनाऽनुभवस्य प्रथमोविषयः। आचार्यमधुसूदनेनोक्तम्–"जाग्रत्स्वप्नभोग्यपदार्थ-ज्ञानाभावेऽपि साक्ष्याकारं सुखाकारम् अवस्थाऽज्ञानाकारं चाविद्याया वृत्तित्रयमभ्यु-पेयते।"[30]

**(ग) सुषुप्तौ अनुभव्यो द्वितीयो विषयः सुखम्–**सुषुप्तौ आत्मा अविद्यावृत्त्या स्वस्वरूपभूतं सुखम् आनन्दापरनामधेयम् अनुभवति। सुखविषयिणी अनुभूतिस्त्रिविधा भवति–तत्र शुद्धानावृतब्रह्मानन्दानुभूतिः प्रथमा, विषयानन्दभूतिर्द्वितीया, आनन्दा-नुभूतिस्तृतीयेति। ब्रह्मानन्दानुभूतिः निर्विकल्पसमाधौ मोक्षदशायाञ्च भवति। तदानीम् अविद्या निवृत्ता भवति। विद्यमानायाम् अविद्यायान्तु अनावृतशुद्धाऽखण्ड-ब्रह्मानन्दस्य अनुभूतिर्नैव सम्भवति। अद्वैतब्रह्मसाक्षात्कारेण अविद्यानिवृत्तौ सत्यामेव शुद्धब्रह्मानन्दस्य अनुभूतिर्भवति। विषयानन्दस्यानुभूतिः स्वप्ने जागरे च भवति। तथाहि शुभादृष्ट-वशात् अभिव्यक्तसत्त्वगुणकान्तःकारणेन सम्बद्धानि चक्षुरादीन्द्रियाणि यदा अनुकूल-विषयेण यह सम्बद्धानि भवन्ति तदा अन्तःकरणं तद्विषयाकारेण परिणमति, तादृशपरिणामात्मिकायाम् अन्तःकरणवृत्तौ ब्रह्मचैतन्यं प्रतिबिम्बते आनन्दांशञ्च अभिव्यनक्ति। विषयाकारान्तःकरणवृत्तौ अभिव्यक्त आनन्दांश एव सुखम् इति कथ्यते। जाग्रत्स्वप्नयोः जायमानैतादृशसुखानुभूतौ विषयस्य कारणता विद्यते, अतस्तयोरनुभूतसुखं विषयानन्दशब्देनोच्यते।

सुषुप्तौ अपि आनन्दस्यानुभूतिर्भवति। तदानीं जाग्रत्स्वप्नयोरनुभूयमानौ स्थूलसूक्ष्मविषयौ न भवतः, तस्मात् तदानीम् अनुभूयमान आनन्दो विषयानन्दो न भवति। सुषुप्तौ आत्मा स्वस्वरूपभूतम् आनन्दम् अनुभवति, परन्तु अविद्यायाः

आवरणशक्त्यां आवृतत्वात् पूर्णाऽखण्डब्रह्मानन्दस्य अनुभूतिरपि तदानीं न सम्भवति। इदानीं प्रश्नोऽयमुदेति यत् यदि सुषुप्तौ आत्मस्वरूपम् अविद्याऽऽवृतं तिष्ठति तर्हि स्वरूपभूतस्य सुखस्य प्रकाशः कथं सम्भवति?

अत्र समाधीयते–अविद्यायाः आवरणशक्तिः आत्मस्वरूपं सम्पूर्णं नावृणोति, तथा सति अविद्याया अपि प्रकाशो न स्यात् जगदान्ध्यञ्च प्रसज्येत; आवरणशक्तिः आत्मनः सामान्यांशं नावृणोति, किन्तु ब्रह्मस्वरूपमेव विशेषांशम् आवृणोति। आत्मनोऽनावृतसामान्यांश एव साक्षिशब्देनोच्यते। उक्तञ्च आचार्येणाप्पयदीक्षितेन– "वस्तुतोऽविद्याऽन्तःकरणतद्धर्मावभासकं साक्षिचैतन्यं विहायैवाऽज्ञानं चैतन्यम् आवृणोति।"[31] एतादृशाऽनावृतसाक्षिणः आनन्दांशस्य प्रकाशः सुषुप्तौ भवति। उक्तञ्चैतत् प्रकाशात्मयतिना–"ननु तदपि सुखम् अविद्याऽऽवृतं न प्रकाशमर्हति? न, अनावृतसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः।"[32] ततः सिद्धम् आत्मा सुषुप्तौ स्वरूपभूतमेव आनन्दम् अनुभवति।

**(घ) सुषुप्तौ अनुभव्यस्तृतीयविषयः अज्ञानम्**–सुषुप्तौ अज्ञानमप्यनुभूयते। एतत्समयेऽन्तःकरणस्य स्वकारणेऽविद्यायां विलये सति अन्तःकरणप्रतिबिम्बितं चैतन्यं जीवाख्यं बिम्बभूतेऽखण्डे आत्मन्येकतां लभते। अतस्तदानीम् आत्मनः स्वरूपभूताऽखण्डसर्वव्यापिस्वरूपस्य भानं स्यात्, परन्तु प्रकृते एवं न भवति सुषुप्तौ। तदानीम् आत्मा स्वस्य अस्तित्वमात्रम् अनुभवति। वस्तुस्थितिरियम् अस्ति यत् सुषुप्तौ आत्मा स्वस्मिन् एकं प्रतिबन्धात्मकम् आवरणम् अनुभवति, यः आत्मनः अखण्डस्वरूपताम् आवृत्य तिष्ठति। फलतः स आत्मा स्वीयम् अखण्डस्वरूपं न जानाति। एतत्प्रतिबन्धात्मकम् आवरणमेव अज्ञानम् इत्युच्यते। अद्वैतवेदान्तदार्शनिकैः सुषुप्तौ एतदावरणात्मकाऽज्ञानाकारेण अविद्याया एका वृत्तिरभ्युपेयते, तस्यां चित् प्रतिबिम्बितं सत् अज्ञानं प्रकाशयति। एतदेव सुषुप्तौ अज्ञानानुभवः1

ननु अविद्यायाः स्वाकारेण परिणामो वृत्तिर्वा कथं भवति? अत्रोच्यते–यथा दीपः अन्यान् घटादिविषयान् स्वञ्च सहैव प्रकाशयति, यथा च अन्तःकरणस्य घटाद्याकारेण स्वाकारेणापि परिणामो भवति, तथैव सुषुप्तौ अज्ञानं सुखाकारेण आत्माकारेण स्वाकारेणापि परिणमति इत्यत्र न क्वापि अनुपपत्तिरिति ध्येयम्।



## 14. उपसंहारः

जाग्रत्स्वप्नसुषुप्तिरित्यवस्थात्रयं चेतनजीवस्य कृते पुरवद् भवति, अतः पुरत्रयमिति कथ्यते। यथा कश्चन पुरुषो नगरे निवसति, अतः सः नागरिक इति कथ्यते तथैव जीवात्मा एतदवस्थात्रये क्रमेण निवसति इत्यतः अवस्थात्रयं पुरत्रयम् इति उच्यते। तस्मिन् पुरत्रये निवसनात् शयनात् वा स जीवः पुरुषः इति अभिधीयते। श्रुतिः जीवस्य यथार्थस्वरूपप्रतिपादनावसरे जाग्रदाद्यवस्थानां पुरत्वं प्रतिपादयति–

> **"पुनश्च जन्मान्तकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः।**
> **पुरत्रये क्रीडति यश्च जीवस्ततः सुजातं सकलं विचित्रम्।**
> **आधारमानन्दमखण्डबोधं यस्मिल्लयं याति पुरत्रयं च॥**[33]

आशयस्त्वयं यत् आत्मा यदा शरीरादिना सम्बद्धो भवति तदा एव आत्मा जाग्रदाद्यवस्थावान् जीवो भवति, अन्यथा स आत्मा नित्यशुद्धबुद्धमुक्तस्वभाव एव विराजते।

❖

## सन्दर्भग्रन्थाः

1. Sleep-wakefulness, Birendra Nath Mallick, National Book Trust, Indian First Edition, 2001, New Delhi, page no.65
2. वेदान्तपरिभाषा, चौखम्भा विद्याभवन, वाराणसी-2000, पृ.85
3. सिद्धान्तबिन्दुः, महेश अनुसन्धान संस्थान, वाराणसी-1997,पृ.158
4. वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.360
5. ब्रह्मसूत्रशाङ्करभाष्यन्यायनिर्णयः 3/2/10
6. Indian Philosophy, Vol.II, page no.599 S. Radhakrishan Oxford Univ. Press, New Delhi, II Edn. XIII Impression, 2006
7. वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.360
8. विद्वन्मनोरञ्जनी (वेदान्तसारटीका), आचार्य रामतृप्त, मोतीलाल बनारसीदास, नई दिल्ली, पृ.66
9. पददीपिका, (पञ्चदशीटीका), श्रीरामकृष्ण, निर्णय सागर प्रेस, मुम्बई, सप्तम सं. 1949, पृ.4

10. सिद्धान्तबिन्दुः, पृ.161

11. पददीपिका (पञ्चदशीटीका), पृ.3

12. तत्रैव

13. Indian Philosophy, Vol. II, Page no.599

14. प्रश्नोपनिषद्, 4/2

15. प्रश्नोपनिषच्छाङ्करभाष्यम्, मन्त्र-4

16. माण्डूक्योपनिषच्छाङ्करभाष्यम्, मन्त्र-4

17. विद्वन्मनोरञ्जनी (वेदान्तसारटीका), पृ.66

18. पददीपिका (पञ्चदशीटीका), पृ.4

19. सिद्धान्तबिन्दुः, पृ.163

20. सिद्धान्तबिन्दुः, पृ.160

21. बृहदारण्यकोपनिषद् मन्त्र--4/3/4

22. विद्वन्मनोरञ्जनी (वेदान्तसारटीका), पृ.159

23. माण्डूक्योपनिषत्, मन्त्र-5

24. Indian Philosophy, Vol. II, Page no.600

25. पञ्चपादिकाविवरणम् , आचार्य प्रकाशात्मयति, महेश अनुसन्धान संस्थान, वाराणसी, प्रथम सं.1992, पृ.174

26. विद्वन्मनोरञ्जनी (वेदान्तसारटीका) पृ.66

27. छान्दोग्योपनिषद् 6/8/1

28. पञ्चपादिकाविवरणम्, पृ.171

29. तत्त्वदीपनम्, पञ्चपादिकाविवरणटीका, अखण्डानन्दमुनि, महेश अनुसन्धान संस्थान, वाराणसी, प्रथम सं.1992, पृ.171

30. सिद्धान्तबिन्दुः, पृ.164-165

31. सिद्धान्तलेशसंग्रहः, पृ.197

32. पञ्चपादिकाविवरणम्, पृ.170

33. कैवल्योपनिषद् 11-12

❖



# लट्लकारार्थविज्ञानम्

डा.चन्द्रमाधवसिंहः

सर्वविदितं तथ्यमिदं यद् धातोः लकारा योज्यन्ते लकारकथनेन पाणिनिना प्रोक्ता लट्लिट्लुट्लृट्लेट्लोट्लङ्लिङ्लुङ्लृङः दश लकारा ज्ञायन्ते।

लडादिषु दशसु अनुबन्धलोपे सति केवलं 'ल्' एव अवशिष्टं भवति। वर्णात्कारः इति महाभाष्यवचनेन कारप्रत्ययं योजयित्वा लकारः इति उच्यते। धातोः आदौ कश्चन लकारः एव भवति तदनन्तरं लस्य स्थाने तिबादेशा यथोचिताः सम्भवन्ति। अत्र नैयायिकवैयाकरणयोः मतवैभिन्यं दृश्यते। नैयायिकाः वदन्ति यत् तिबादिस्मृताः लकाराः एव अर्थबोधकाः। वैयाकरणानामनुसारम् अर्थवाचकः तिबादेशः एव भवति न तु लडादिः स्थानी। यद्यपि "तत्र ऋषिभिः स्थानिनां कल्पिताः अर्थाः कण्ठरवेणैवोक्ताः। आदेशानां तु स्थान्यर्थाभिधानसमर्थस्यैवादेशता।"[1] इति नागेशभट्टस्य वचनेनानेन ध्वनितं भवति यत् सोऽत्र नैयायिकानां मतं समर्थयति। विषयोऽयं पृथग्रूपेण शोधस्य विषयः भवितुमर्हति अतः विस्तारभयेन अत्रैताव देव अलम्।

लकाराणां प्रत्यक्षं सम्बन्धः कालेनैवास्ति। संस्कृतव्याकरणे यद्यपि कालः अखण्डोऽस्ति तथापि व्यावहारिकदृष्ट्या कालभेदस्य ज्ञानं तु भवति एव। कालभेदस्य प्रतीतेः कारणं क्रियाभेदोऽस्ति।[2] व्याकरणस्य प्रक्रियाभागो 'भवति अभूत् भविष्यति' चेत्यादीनां रूपाणां सिद्धिं करोति। इयं सिद्धिः कालभेदस्य आधारेण एव सम्भवास्ति अतः कालभेदो व्यावहारिकदृष्ट्या स्वीकरणीय एव 'सन्ति च कालविभागाः।'[3]

आधुनिकवैज्ञानिकानामनुसारं पृथिव्याः परिधिना समयस्य परिभाषा माप्यते। समयमापनस्य पक्षद्वयम् अस्ति - एकं तु व्यावहारिकतानिमित्तम् अपरञ्च वैज्ञानिक-प्रयोगनिमित्तम्। वयं दिवसस्य समयं ज्ञातुम् इच्छामः येन घटनानां क्रमशः सम्बद्धतां कर्तुं शक्नुयाम। अनेन तथ्यमिदं पुष्टीभवति यत् कालविभागो व्यवहारस्य कृते, एवमेव व्याकरणदर्शनमपि वर्तमानभूतभविष्यद्रूपेण कालं विभज्य सर्वेषां क्रियारूपाणां सिद्धिं कर्तुम् अवकाशं प्रददाति। इदं शीघ्रम् अभवत्, इदं चिरेण भविष्यति इत्यादिविभिन्नवाक्यानां दृष्ट्या एव अयं कालविभागः करणीयोऽभवत्। वस्तुतः विभागोऽयं कल्पनापरक एवास्ति।

'वर्तमाने लट्'[4] इत्यनेन सूत्रेण वर्तमानेऽर्थे लट्लकारः भवति। वर्तमानत्वं क्रियागतं स्वीक्रियते। क्रियात्मककालस्याऽभिप्रायेणैव कौण्डभट्टः वर्तमानत्वस्य लक्षणं कृतम्– 'प्रारब्धापरिसमाप्तत्वम्'[5] इति अर्थात् यस्य क्रियात्मककालस्य प्रारम्भः जातः परन्तु तस्य क्रिया समाप्ता न स्यात्। तद्विधक्रियायाः अधिकरणतया उपलक्षितः कालः वर्तमानकालः कथ्यते। कौण्डभट्टः वर्तमानस्य द्वितीयं लक्षणं करोति–"भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्।"[6] अर्थात् भूतात् भविष्यतश्च भिन्नः क्रियात्मकः कालः वर्तमानकालः उच्यते। यथा–पचति इत्यत्र अधिश्रयणात् आरभ्य अधिश्रयणान्ते मध्ये वर्तमानत्वं तिष्ठति तथा तस्मिन्नेवार्थे लट्लकारस्य प्रयोगः भवति।

अत्र आशङ्का भवति यत् 'आत्मा अस्ति', 'पर्वताः सन्ति' इत्यादिस्थलेषु लट्लकारः भवितुं नार्हति यतो हि आत्मपर्वतादिषु सत्तारूपक्रिया एका अखण्डा नित्या च भवति। अत्र न त्वारम्भः सम्भवोऽस्ति न च समाप्तिः। सदैव अनयोः सत्तायाः विद्यमानत्वात् भूतत्वं भविष्यत्वं चापि नास्ति सम्भवम्। अस्मात् कारणात् तद्भिन्नत्वरूपं वर्तमानत्वमपि असम्भवम् अतः प्रारब्धापरिसमाप्तत्वं तथा भूतभविष्यद्भिन्न-त्वम् इत्यनयोः लक्षणयोः अभावे आत्मा अस्ति इत्यादौ वर्तमानकालस्य व्यवहारः कथं वा सङ्गतः स्यात्।

एतस्याः शङ्कायाः समाधाने कौण्डभट्टः वदति यत् आत्मपर्वतादौ नित्या अखण्डा च एका क्रिया अस्ति तत्कारणतः असंघटितेऽपि वर्तमानलक्षणे तत्तत्कालीनराज्ञां क्रियाः अनित्याः सखण्डाः अनेकाश्च भवन्ति अतः तेषां राज्ञाम् अनित्यक्रियासु विशिष्टसत्तारूपक्रियायाः अनित्यत्वात् वर्तमानत्वस्य लक्षणस्य समन्वयं कर्तुं शक्यते। अत्र राज्ञां प्रधानत्वात् तेषामुल्लेखः कृतः। यां कामपि अनित्यक्रियां स्वीकृत्य 'आत्मा' इत्यस्य सत्तारूपक्रियायाम् अनित्यत्वस्य उपपादनं कर्तुं शक्यते।

कौण्डभट्टस्य संङ्केतः अस्ति यत् एतादृशम् उपपादनं न तु कल्पनामात्रम् अपि तु महाभाष्यकारः पतञ्जलिरपि इममेवाभिप्रायं प्रकटयति। ते पर्वताः तिष्ठन्ति इत्यस्य वाक्यप्रयोगस्य सन्दर्भे 'वर्तमाने लट्' इति सूत्रे कथयति–"इह भूतभविष्यद्-वर्तमानानां राज्ञां क्रिया तिष्ठतेरधिकरणम्।"[7] अर्थात् भूतानां भविष्यतां वर्तमानानाञ्च राज्ञां क्रिया 'स्था' धात्वर्थक्रियायाः अधिकरणानि सन्ति तथा तेषामेव क्रियाः स्वीकृत्य पर्वतः अपि तेषाम् अधिकरणं मन्यते अन्यथा पर्वतस्य नित्यत्वात् तेषु भूतत्वादिक्रियाभिः विशिष्टायाः स्थाधात्वर्थगतिनिवृत्तिरूपक्रियायाः अधिकरणत्वं सम्भवं नास्ति। वाक्यपदीयकारेणापि प्रोक्तम्–

**परतो भिद्यते सर्वमात्मा तु न विकम्पते।**
**पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥"[8]**



अर्थात् पचादिधात्वर्थक्रिया सामान्या तथा च आत्मपर्वतादिनित्यपदार्थाः स्वस्मात् भिन्नस्य वर्तमानत्वादेः भेदात् भिन्नाः भवन्ति। यत्र वर्तमानभूतभविष्यत्कालानां भिन्नरूपेण प्रतीतिः भवति। पर्वतः आत्मा इत्यादीनां सत्ता राजा इत्यादिक्रियाणां भेदेन भिन्ना भिन्ना प्रतीयते। एवं सति एव 'तम आसीत्', 'तुच्छेनाभ्यपिहितं यदासीत्', 'अहमेकः प्रथममासम्', 'वर्त्तामि च', 'भविष्यामि च।'[9] अर्थात् अहम् आत्मा पूर्वम् एकः आसम्, इदानीमपि एकः अस्मि, भविष्येऽप्येको भविष्यामि इत्यादयः श्रुतयः सङ्गताः भवन्ति अन्यथा आत्मनः नित्यत्वात् तत्र भूतादिकालस्य व्यवहारः कथं वा अभविष्यत्?

वर्तमानत्वाद्यर्थाः लडादिलकारैः द्योत्याः भवन्ति न तु वाच्याः। वर्तमानत्वादयः लडादिलकारणां वाच्यार्थाः द्योत्यार्थाः वेत्यत्र पक्षद्वयं शास्त्रसम्मतमस्ति। एकः पक्षः अयमस्ति यत् क्रियासामान्यस्य बोधः धातुना भवति तथा तद्धातोः एव वर्तमानत्वादिविशि-ष्टक्रियायां लक्षणाकरणेन धातुद्वारैव अयमर्थो लभ्यो भवति। लडादेः तस्मिन् 'वर्तमानत्वादि'–अर्थे शक्तिं मन्तुं कापि आवश्यकता नास्ति। अस्यां स्थितौ लडादिलकाराः धातुलभ्यस्य अर्थस्य केवलं तात्पर्यग्राहकाः सन्ति। द्वितीयोऽयं पक्षः यत् पचति इत्यादौ धातोः अनन्तरं लडादेः स्थाने आदेशभूततिबादेः उच्चारणे सत्येव प्रतीतिः भवति। वर्तमानादेः अर्थस्य तिबादिना रहितं पचादिधातुमात्रे उच्चारिते सति वर्तमानत्वादेः प्रतीतिः न भवति इति अन्वयव्यतिरेकाभ्यां वर्तमानत्वादिः लडादेः स्थाने आदेशभूतस्य तिबादेः एव वाच्यः अर्थः अस्ति अन्यथा प्रत्ययानां वाचकत्वमेव भग्नम् अभविष्यत्। एवं प्रकारेण लडादीनां वाचकत्वपक्षः अपि सिद्धः अस्ति।

वाक्यपदीये वर्तमानकालविचारः महाभाष्यपद्धत्या एवमस्ति। 'वर्तमानकालः सः मंस्यते यत्र क्रियायाः आरम्भः समाप्तः न भवेत्।'[10] अतो यावद् अध्ययनं समाप्तं न भविष्यति तावत् वर्तमानकाले प्रयोक्तुं शक्यते। मध्ये मध्ये याः भोजनादिक्रियाः व्यवधानरूपेण ज्ञायन्ते ताः नान्तरीयकाः सन्ति अतः ताः व्यवधायिकाः भवितुं नैव शक्नुवन्ति। भर्तृहरिमतेन एतादृशी कापि क्रिया न सम्भवति यत्र क्रियान्तरव्यवधानं न स्यात्।

निमेषश्वसनादिक्रियाः सर्वत्र विद्यमानाः स्थास्यन्ति एव। यथा--भोजनादिक्रियां कुर्वन् अपि देवदत्तः मध्ये श्वसनादिक्रियां करोति एव। अतः नान्तरीयकत्वेन मध्यवर्तिनीभिः क्रियाभिः मुख्यक्रियायाः व्यवधानं स्वीकृत्य तत्र वर्तमानत्वस्य अभावः नैव आशङ्कनीयः अपि तु मध्ये अवश्यरूपेण विद्यमानाः सर्वाः क्रियाः मुख्यक्रियायाः अङ्गभूताः एव।[11]

यत्र अध्ययनादिक्रियायां भोजनादिक्रियया व्यवधानं भवति तत्र मध्ये अध्ययनादिभौतिकव्यापारस्य उपरतत्वेऽपि मानसिकव्यापारस्य विद्यमानताकारणतः क्रियासन्तानस्य ऐक्येन वर्तमानकालस्य उपपत्तिः सम्भवति। यथा हेलाराजेन उक्तम्- ''सन्दर्शनादिफलपर्यन्तः क्षणसमूहः क्रिया। तत्र भौतिकव्यापारोपरमेऽप्यन्तरा सन्दर्शनप्रार्थनादेः मानसव्यापारस्य यावत् फलादिगमः तावदविराम एव।''[12] तस्मात् क्रियान्तरव्यवधानेऽपि 'अधीते' 'अधीमहे' इत्यादिरूपेण वर्तमानकालप्रयोगः भवत्येव।

भर्तृहरेः अनुसारं वर्तमानकालः द्विधा भवति-एकं मुख्यमस्ति यत् प्रारब्धा-परिसमाप्तार्थे भवति। द्वितीयं तदस्ति यत् 'वर्तमानसामीप्ये वर्तमानवद् वा'[13] इति पाणिनीयं सूत्रानुसारं भूते भविष्यति चार्थे भवति। कदाचित् क्रियायाः समाप्तेः पश्चादपि क्रियायाः संस्काराः अवशिष्टाः भवन्ति। तदाधारेण भूतविषयकं वर्तमानसामीप्यं भवति अर्थात् भूतकालस्य अर्थे वर्तमानकालस्य प्रयोगः क्रियते। भविष्यद्विषयकं वर्तमानसामीप्यं तत्र भवति यत्र भविष्यत्क्रियायाः मानसिकसङ्कल्पेन वर्तमानरूपम् आयाति। वर्तमानकालस्य इदं रूपं वैकल्पिकं मन्यते। फलतः अयमागच्छामि, अयमागमम्, एषोऽस्यागतः इत्येतादृशानि वाक्यानि एकस्यैव अवसरस्य निमित्तं प्रयुज्यन्ते।

वसन् ददर्श इत्यादौ भूतकालेऽपि लट्लकारे जाते तस्य स्थाने 'लटः शतृशानचावप्रथमासमानाधिकरणे'[14] इत्यनेन सूत्रेण धातूनाम् अर्थद्वारा परस्परसम्बन्धे यत्र काले, प्रत्ययाः उक्ताः, ततोऽन्यस्मिन् काले विधानात्। एवञ्च साक्षात् धात्वर्थानां परस्परसम्बन्धाभावात् उक्तप्रयोगेषु कारकद्वारा सम्बन्धः ज्ञातव्यः। अत एव 'विवाहः निश्चितः अस्ति', 'भाव्यासीत्' 'सोम राज्यस्य पुत्रः भविता' इत्यादि प्रयोगाणां सङ्गतिः सम्पद्यते। तस्मात् वर्तमाने एव लट्लकारविधानात् वर्तमानत्वमेव लट्लकारार्थः इति कौण्डभट्टस्य अभिमतम्।

आशंसाया अर्थेऽपि वर्तमानकालस्य प्रयोगः वैकल्पिकरूपेण दृश्यते। अप्राप्तं प्रियम् अर्थं प्राप्तुम् इच्छा आशंसा कथ्यते। यद्यपि प्रार्थनायाः अथवा इच्छायाः सम्बन्धः वर्तमानेन अस्ति परन्तु आशंसायाः विषयः भविष्यत्कालः भवति। अनेनाधारेण महाभाष्ये आशंसा भविष्यत्काला मता-'आशंसा नाम भविष्यत्काला'[15] भविष्यत्कालेन सम्बन्धे स्थितेऽपि तेन सह भूतकाल इव प्रत्ययाः भवन्ति। परिणामतः वर्तमानः भूतः भविष्यत् इति जयोऽपि कालाः आशंसाया अभिव्यक्तौ प्रयुज्यन्ते। केचन आशंसां सम्भावनां च समानार्थकां मन्यन्ते। केचन सम्भावनां आशंसायाः अवयवं मन्वते, केचन उभयोः कञ्चन भेदं स्वीकुर्वते।[16] भेददृष्ट्या अनयोः इदमन्तरमस्ति



यत् आशंसायाम् ईप्सितार्थस्य प्राप्तिः साधनबलेन शक्या अशक्या च उभावपि भवति किन्तु सम्भावनायां तस्य प्राप्तिः शक्या भवति।[17] वस्तुतः आशंसा प्रयोक्तृधर्मः अस्ति। आशंसा शब्दस्य अथः नास्ति तथापि सः शब्दसंस्कारे निर्मितो भवति। पुरुषधर्मेऽपि शास्त्रस्य प्रवृत्तिः भवति इति वाक्यपदीयकारमतम्।[18]

कदाचित् भूते अर्थेऽपि वर्तमानकालस्य प्रयोगः भवति। यथा-बलिकंसयोः घटना परस्सहस्रं वर्षेभ्यः प्रवृत्ता चेदपि 'कंसं घातयति', 'बलिं बध्नाति' इत्येतादृशाः वर्तमानकालिकप्रयोगाः दृश्यन्ते। भाष्यकारस्य मतानुसारम् एषां वाक्यानां वर्तमानकालप्रयोगस्य आधारः वर्तमानकाले रङ्गमञ्चे प्रस्तूयमानस्य कंसवधस्य बलिबन्धनस्य च व्यापारः अस्ति। नटाचार्याः तान् व्यापारान् प्रत्यक्षं दर्शयन्ति। तेषां मनसि तद्व्यापाराणां बुद्धिविषयकसत्ता तिष्ठति अत एव ते तान् व्यापारान् प्रत्यक्षमिव अभिव्यक्तान् कर्तुं समर्थाः भवन्ति-

**शब्दोपहितरूपाश्च बुद्धेर्विषयतां गतान्।**
**प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥**[19]

केवलं वर्तमानस्य एव न अपि तु भूतस्य भविष्यतश्चापि प्रयोगः एतादृशेषु अवसरेषु क्रियते। तस्याः एकस्याः एव घटनायाः त्रिषु कालेषु प्रयोगः एवं प्रकारेण दृश्यते-

**गच्छ, हन्यते कंसः।**
**गच्छ, हनिष्यते कंसः।**
**किं गतेन हतः कंसः।**

कदाचित् मुख्यस्य वर्तमानस्य क्षेत्रे तन्नाम प्रारब्धापरिसमाप्तावस्थायां भूतकालस्य व्यवहारः दृश्यते। केनचित् पाटलिपुत्रं प्रति प्रस्थितम्। अतीते एकस्मिन् दिने सः मार्गे स्थितः। सम्प्रति तेन पाटलिपुत्रं न प्राप्तं तथा यावत् न प्राप्स्यते तस्य गमनक्रिया अपरिसमाप्ता मंस्यते। तथापि मार्गे एकस्य दिनस्य स्थितिः अस्ति चेदपि अद्य एतावान् मार्गः अतीतः इत्यस्य कृते 'इदमद्य गतम्' इति भूतकालिकप्रयोगः भवति। अपरिसमाप्तायामपि गमनक्रियायां यावान् अंशः समाप्तः तमेव मत्वा समाप्तिसूचकस्य भूतकालस्य प्रयोगः क्रियते। वस्तुतः क्रियायाः नैकाः अवयवाः भवन्ति। शब्दस्य आधारे समूहरूपक्रियायाः येन अवयवेन सह सम्बन्धः भवति। तस्मिन्नेव तस्य समाप्तिः अपि भवति। अवयवानां त्रिभिः कालैः सह सम्बन्धत्वात् क्रियायाः अपि त्रिभिः कालैः सहयोगः उपपन्नः अस्ति।[20]

एवं प्रकारेण उपर्युक्तमतानामाधारेण वयं वक्तुं शक्नुमः यत् प्रसङ्गवशात् कदाचित् लट्लकारस्य प्रयोगः भूतार्थे भविष्यदर्थे चापि सम्भवति इत्यत्र नास्ति काचित् संशीतिः। ❖

**सन्दर्भग्रन्थाः**

1. परमलघुमञ्जूषा–शक्तिनिरूपणम्।
2. क्रियाभेदाद् यथैकस्मिंस्तक्षाद्याख्या प्रवर्तते।
   क्रियाभेदात् तथैकस्मिन्नृत्वाद्याख्योपजायते।।
   वाक्यपदीयम्, कालसमुद्देशः कारिका सं.32
3. भाष्यवार्तिकम्।
4. अष्टाध्यायी 3.2.123
5. वैयाकरणभूषणसारः–लकारार्थनिर्णयः।
6. वैयाकरणभूषणसारः–लकारार्थनिर्णयः।
7. महाभाष्यम् 3.2.123
8. वाक्यपदीयम्।
9. वैयाकरणभूषणसारः–लकारार्थनिर्णयः।
10. "एष नाम न्याय्यो वर्तमानः कालः यत्रारम्भोऽनपवृक्तः।"
    महाभाष्यम् – 3.2.123
11. वाक्यपदीयम्–कालसमुद्देशः–कारिकासंख्या– 82-84
12. हेलाराजः, वाक्यपदीयम् – कालसमुद्देशः–कारिका संख्या–82-83
13. अष्टाध्यायी 3.3.131
14. अष्टाध्यायी 3.2.124
15. महाभाष्यम् – 3.3.132
16. संस्कृतव्याकरणदर्शन–कालविचार, पृ.सं.233
17. महाभाष्यम् – 3.3.132
18. हेलाराजः, कालसमुद्देशः, कारिका सं.105
19. वाक्यपदीयम् – प्रकीर्णकाण्डम् – साधनसमुद्देशः कारिका संख्या–5
20. "शब्देन प्रत्याय्यमाना येन येनावयवेन संबध्यते समूहरूपा क्रिया तस्मिन्नेवावयवे समाप्यते तत्र अवयवानां कालत्रययोगात् क्रियायाः अपि कालत्रययोगः।"
    प्रदीपः 3.2.102

❖



# नागार्जुनस्य संस्कृतसाधना

**डा.सुनीलकुमारप्रधानः**

हिन्दीसाहित्ये लब्धप्रतिष्ठो मैथिलीभाषायाः कविश्रेष्ठः बङ्गभाषायां कृतभूरिपरिश्रमः कविवर्यः नागार्जुनः संस्कृतकविपरम्परायां यद्यपि बहुप्रसिद्धिं नालभत, तथापि तस्य संस्कृतरचनाः विशिष्टं स्थानमलङ्लकुर्वन्ति। त्रयोदशवर्षदेशीयः सन् कविरयं समस्यापूर्तिद्वारा कविकर्मणि सुतरां संलग्नोऽभूत्। 'बालानां रोदनं बलम्' इति समस्यापूर्तिस्तु कवेः प्रौढ़कल्पनाप्रतिभायाः निदर्शनमेव।[1] आरम्भिककाले कविवरेण नागार्जुनेन स्फुटश्लोकाः रचिताः। विपन्नताकारणतः तच्छ्लोकानां समुचितं संरक्षणं न जातम्। किञ्च, देशदशक-कृषकदशक-श्रमिकदशक-इत्यादयः ग्रन्थाः तेन प्रणीताः किन्त्वधुनैकोऽपि ग्रन्थः नैव प्राप्यते। कविनागार्जुनः वैद्यनाथमिश्रः 'विद्यार्थी' वैदेहः यात्री चेति त्रिभिः नामभिः साहित्यजगति प्रसिद्धः परञ्च मैथिलेतररचनाः 'नागार्जुन' इति नाम्ना एव प्रसिद्धाः वर्तन्ते।

विहारप्रान्तस्य द्वारभङ्गजिलान्तर्गते 'तरौनी' इत्याख्ये ग्रामे 1911 तमे वर्षे लब्धजन्मा कविनागार्जुनः साहित्यजगति नव्ययुगवाहकः सञ्जातः। युगधारा-प्यासी-पथराई आँखें-वरुण के बटे, बलचनमा इत्यादीनां हिन्दीकाव्यानां रचयिता। चित्रा-पत्रहीन-नग्न गांछ इति काव्यसंग्रहद्वयं मैथिलभाषायाः चर्चितकाव्यं विद्यते। पत्रहीन-नग्न गांछ-इत्येदर्थं कविः साहित्य-अकादमी-पुरस्कारेणापि पुरस्कृतः। बङ्गभाषायां प्रकाशितः 'आमि मिलिटारिर बुड़ो घोड़ा' इति काव्यसङ्ग्रहः कवेः प्रौढ़कल्पनायाः परिचायकः। कवेः रचनासु हिन्दी-मैथिली-बङ्ग-भाषाणां त्रिवेणी सङ्गतिः वर्तते। आजीवनं विविधसंस्थानां मुख्यसदस्यः सन् यायावरजीवनं यापयन् सः काव्यं चकार।

महाकवेः नागार्जुनस्य कविकर्मणः आधारशिला संस्कृतभाषा एव। बहुभाषासु

समानाधिकारपूर्णपाण्डित्येन सह काव्यरचनायां प्रवीणः कविः स्वीकरोति-'संस्कृत-काव्यरचनाभूमिः यदा मम पुरतः समायाति तदा हिन्दीबङ्गमैथिलचिन्तनानि विस्मृतानि विस्मारितानि च भवन्ति।' पुनश्च 'शब्दसङ्घटनसंयोजनसामर्थ्यं संस्कृतादेव प्राप्तवान् अस्मीति'[2] अपि कविना बहुत्राङ्गीकृतम्। जयदेवरचितस्य गीतगोविन्दस्य भावानुवादः प्रमाणीकरोति यत् कविः मूलकवेः कल्पनानुरूपमेव जीवति अनुवादप्रसङ्गे। अपरत्र मेघदूतस्य मुक्तछन्दोभिः (हिन्दीकाव्यविधानविशेषैः) भावानुवादः चेतो रञ्जयति। आस्वादयामस्तावत्-'**गोरी....छरहरी.....सम स्निग्ध सुकान्त सुपंक्ति दांतो वाली बिम्ब के पके फलों जैसे होंगे लाल कोमल रसीले होठ।**[3] एतस्मादपि हृद्यं वर्तते कविना रचितं 'मेघदूतभूमिका'इति। यतो हि अनुवादस्तु मौलिककार्येभ्योऽपि क्लिष्टतरो भवतीति विद्वद्भिः प्रथितम्। वस्तुतः समस्यापूर्तिद्वारा काव्यरचनायां लब्धप्रवेशः नागार्जुनः समुचितमवसरं प्रतीक्षते स्म। अवसरानुगुणं तस्य लेखनी लेनिनस्तोत्रम्, हिंसामहिमा, चिनारस्मृतिः भारतभवनम्, देशदशकम् इत्यादीनां रचनानां प्रसविनी सञ्जाता।

कविरचितं महाकाव्य-गद्य-नाटकादिकं न लभ्यते। तथापि स्फुटरचनाभिः संस्कृतकाव्यस्य पूर्वप्रथितपरम्पराणां प्रवर्धनं प्रसारणमनुकरणञ्च इत्येतदपेक्षया संस्कृतगङ्गाधारायाः प्रवाहपरिवर्तनमेव अभीष्टं तस्य। अतएव वक्तुं शक्यते विगलितमानवचेतनायाः उद्धारः एव 'नागार्जुनस्य संस्कृतकाव्यानां मूलस्वरः।[4] तदर्थमेव सततं यत्नशीलः सः कविः प्राच्यसिद्धान्तं नव्यशैल्या प्रतिपादयति। संस्कृतकाव्यानां वस्तुस्वरूपं पश्यामश्चेत् प्रायशः सर्वत्र एकस्य वर्गविशेषस्य (आभिजात्यस्य) रागभयशोकसङ्घर्षाणामेव कथा वरीवर्ति न तु वास्तविकस्य जीवनस्य आघातप्रतिघातौ। जीवनस्य कृते वेदनाविगलितस्य मानवस्य क्रन्दनं नापितु व्यायामकाले सत्यपि उत्सवकाल आचर्यते। कविः तत्सर्वं परिवर्त्य तत्स्थाने नूतनां प्रणालीमभिलषति। स जीवनस्य वास्तविकं स्वरूप प्रस्तौति। '**कालिदास सच सच बतलाना इन्दुमती के मृत्यु-शोक पर अज रोया या तुम रोए थे।**' इत्यस्यां हिन्दीकवितायां भाव एष नूनमेव संस्कृतकाव्यमाश्रित्य प्रवर्तते।

रचनाशिल्पमुखेनात्र छन्दोगुणालङ्कारादीनां विमर्शः क्रियते। लेनिनस्तोत्रं हिंसामहिमा चानुष्टुप्-छन्दसास्तः, अपरत्र स्रग्धरा-शार्दूलविक्रीडित-वसन्ततिलकादीनि



प्रयुक्तानि सन्ति। आस्वाद्यमिदमेकं शार्दूलविक्रीडितम्–

**वासन्ती कनकप्रभा प्रगुणिता पीतारुणैः पल्लवै-**
**र्हैमाम्भोजविलासविभ्रमरता दूरे द्विरेफाः कृताः।**
**यैराखण्डलकेलिकाननकथा विस्मारिता भूतले**
**छायाविभ्रमतारतम्यतरलास्तेऽमी चिनारद्रुमाः॥**[5]

अवृत्तिरल्पवृत्तिर्वा मधुरा रचनाः सर्वत्र श्रुतिमात्रेणार्थबोधिकाः, न क्वापि दूरान्वयः न च ग्राम्यदोषः। इत्यतः नागार्जुनस्य रचनासु माधुर्यप्रसादगुणयोः साम्राज्यम्। क्वचिदनुप्रासन्तु क्वापि उपमोत्प्रेक्षारूपकाश्च अलङ्काराः सहृदयान् मनो रञ्जयन्ति। 'शयानोऽपि हि जागर्षि'[6] इत्यत्र विरोधालङ्कारः त्वन्यत्र 'जारलेनिनयोर्युद्धं जारलेनिनयोरिव'[7] इत्यस्मिन् अनन्वयालङ्कारश्च कवेः पाण्डित्यं द्योतयतः। सरससुबोधशैल्या रचिताः सर्वाः रचनाः विशिष्टतया वैदर्भीरीतिमेव आश्रयन्ते। कविः नागार्जुनः वाल्मीकि-कालिदासाभ्यां नितरां प्रभावितः। शयानोऽपि हि जागर्षि 'स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव'[8] इत्यनेन सह तुलनीयः। पुनश्च, जारलेनिनयोरिव 'रामरावणयोर्युद्धं रामरावणयोरिव'[9] इत्यंशं स्मारयति।

संस्कृतकाव्यशृङ्खलायां प्रबन्धादिभेदेषु वास्तविकस्य जीवनस्य स्पन्दनं न प्राप्यते, तत्तु मुक्तरचनास्वेव बहुशः दृश्यते। तस्मादेव महाकविः नागार्जुनः यथासमयं यदनुभूतवान् तन्निरूपितवान्। मानवेभ्यः शुभङ्करी दानवेभ्यश्च भयङ्करी काचित् एका लोकलक्ष्मीसमाहिता शासनपद्धतिः कांम्यते कविना।[10] यथाऽऽह लेनिनस्तोत्रे–

**स्वेच्छाप्रणोदिते स्वाम्ये समेषां सहभागिता।**
**सत्यश्रमाभ्यामित्येषा सुस्थिरा तव पद्धतिः॥** अर्थात्

तव (लेनिनस्य) पद्धतिः सत्यश्रमार्जिता तथा च स्वामित्वे सर्वेषां प्रजाजनानां सहभागित्वयुता अस्तीत्यतः सुस्थिरा। एतादृशीं शासनपद्धतिं वाञ्छति कविः। एतेन कवेः चिन्तनसरणिः अतीव स्पष्टा मुखरा वा सञ्जातास्ति। तस्य मुक्तव्यङ्ग्यरचनाः अपि महत्त्वपूर्णाः सन्ति। आधुनिकं डालरं (मुद्राविशेषं) प्रक्ति कवेः दृष्टिः इत्थं वर्तते-'स्वर्णदाडिमानि इव एते मनोहराः डालराः साम्प्रतं विश्वेऽस्मिन् राजन्ते। यूका, लिक्षा अपि योगिनीवत् आकाशभ्रमणं करिष्यन्त्यत्र नास्ति विस्मयः।' प्रजापीडनपण्डिताः नेतारः ईदृशाः सन्ति–

निस्त्रपाः क्रूरकर्माणो लोकचित्ताद् बहिष्कृताः।
प्रशस्तिमेव मन्यन्ते ते गोमायुरुतान्यपि॥
छेदने भेदने दक्षा द्विदलत्रिदलप्रियाः।
कर्णेजपाः स्वार्थपरा धन्याः पैशुन्यजीविनः॥[11]

प्राचीनप्रबन्धादिकाव्यानां सौन्दर्यप्रकृतिवर्णनपरायणः कविः प्रखर-समकालीन-चेतनां सामान्यमानवस्य यातनाञ्च अद्रष्टुकामः क्षुधातृषाविरहितः स्वर्गलोकजीवी तारुण्यप्रेमी भवति। किन्त्वेष महाकविः नागार्जुनः निगदति–

**क्षुत्क्षामं शुष्ककण्ठे विषमतलगृहे निर्झराणां कुलेऽस्मिन्।**
**शैत्याधिक्येन शश्वद्विजडितगतिका खिन्दतीयं वितस्ता॥**[12]

तात्पर्यार्थोऽयं विद्यते यद् यां परितः सहस्राणि पत्रविरहिताः देवदारुवृक्षाः पाण्डुत्वचः आवरणे सुप्ताः खल्विन्द्रियचेतना हीनभावनया ग्रस्तास्सन्ति, यस्याः निर्झराः क्षुधया शुष्काः, कण्ठे कण्टकानि, विषमतलं शैत्यप्रभावात् नतोन्नतं, गतिहीना चेयं वितस्ता सर्वथा कष्टमनुभवन्ती यथाकथञ्चित् जीवति। अत्र स्वरूपं यत् वितस्तानद्याः तत्तु प्रकृतिमुखेन खिद्यमाना मानवता सहृदयानां पुरतः समानीता कविवरेण नागार्जुनेन। अतः कवेरुद्घोषः यथार्थताम् आवहति–'आकल्पमेव सीदन्तु शस्त्रास्त्रव्यवसायिनः।' यतः अहिंसायाः आग्रही कविरयं 'हिंसामहिमा' द्वारा स्वाभिप्रायं प्रकटयति–

**हिंसे देवि नमस्तुभ्यं महाकालसहोदरे।**
**शतसाहस्त्रिकां जिह्वा नाद्यापि तव तृप्यति॥**[13]

काव्यबिम्बमित्येकं निकषं मन्यते पाश्चात्त्यालोचनान्तर्गति। एतद्दृष्ट्या नागार्जुनस्य काव्यानि पश्यामश्चेत् कल्पनाप्रौढः कविः प्रतिपदं बिम्बं स्थापयति। चिनारस्मृति इत्यस्मिन् काव्ये चिनारेण सह सम्भाषयन्निव कविः ब्रूते-तारुण्यस्य समयस्त्वव विलम्बितः, यौवनं सुदीर्घं वार्धक्यञ्च चिरन्तनं, वर्षशतानि दिवानिशं पीतं त्वयाऽऽमृतचषकाणि, सत्यं वद चिनार! अस्ति कश्चिद् वयस्यस्तव? एकत्र निर्झरोद्यानमण्डपे कविनोपस्थापितमेकं विचित्रं बिम्बम्–

**भूरिशः पश्यति वरो नवोढायाः मुखाम्बुजम्।**
**सा वीक्षते नीलहृदे बल्लभस्य विलोचने॥**[14]



आशयोऽयं वर्तते यत् नायकः वारं वारं नवविवाहितायाः वध्वाः मुखकमलं पश्यति। सा च सरोवरस्य नीले जले स्वभर्तृनयने पश्यतीति। 'खिन्दतीयं वितस्ता' इत्यत्रापि मनोहरं बिम्बं द्रष्टुं शक्नुमः। मूर्त्तामूर्त्तयोः बिम्बयोः या स्वाभाविकता अत्र दृश्यते सा तु विरलैव।

महाकवेः नागार्जुनस्य काव्यानां विमर्शानन्तरं स्पष्टतया वक्तुं शक्यते यत् संस्कृतकाव्यप्रवाहः परिवर्तितः, कल्पनायाः नव्यधारा प्रदर्शिता, वर्णनेषु व्यङ्ग्यञ्चाविष्कृतं महाकविना नागार्जुनेन। सहजसहृदयसंवेद्यभाषा तथा च प्रयोगधर्मिता कवेः रचनासु स्वतः स्फूर्ततयोपन्यस्ता। सामाजिकं परिवर्तनं नेतॄणामधश्चिन्तनमपि काव्यानां सबलपक्षौ वर्तेते। कदाचित् दुर्व्याख्यया विषमूर्च्छितानि मूल्यानि दृष्ट्वापि कविः चिन्ताकुलः प्रतीयते।[15] समासतः स्वस्थसमाजसंरचने कटिबद्धः कविः समेषां कल्याणाय काव्यं कर्तुमुत्सहते इत्यत्र नास्ति सन्देहः। भाविनि काले नागार्जुनस्य संस्कृतसाधनामधिकृत्य इतोऽपि शोधकार्यमपेक्ष्यते साहित्यसमाजोपकारायेति शम्।

❖

## सन्दर्भग्रन्थाः


1. नागार्जुन-रचनावली, खण्डम्-3, भूमिका
   सम्पादक- शोभाकान्त, राजकमल प्रकाशन
2. तथैव
3. नागार्जुन - रचनावली, 1/516/84 तन्वी श्यामा शिखरिदशना
4. परिषत्-पत्रिका, वर्षम्-38, पृ.143
5. नागार्जुन-रचनावली, 3/25
6. लेनिनस्तोत्रम्- 3
7. लेनिनस्तोत्रम्- 3
8. रघुवंशम्, 10/24
9. रामायणम्, युद्धकाण्डम्
10. लेनिनस्तोत्रम्, 10
11. व्यङ्ग्यरचनाः, परिषत्-पत्रिका, पृ.149
12. नागार्जुन-रचनावली, 3/25
13. हिंसामहिमा, नागार्जुन-रचनावली, 3/23
14. चश्माशाही,
15. लेनिनस्तोत्रम्,1


❖



# शब्दवृत्तिविचारः

डां.रामनारायण द्विवेदी

तत्र "तादाम्यलक्षणः सम्बन्धः शक्तिः"[1] इति भगवान् सूत्रकारः। "योग्यतारूपा शक्तिः"[2] इति भर्तृहरिः। "सैव बोधजनकता"[3] इति भूषणकारः। "वाच्यवाचकभाव सम्बन्धरूपा सा"[4] इति मञ्जूषाकारः। एकस्मिन् शब्दे अनेकार्थनिरूपितं तादात्म्यमेकमनेकं वा इत्यत्र भाष्याभिमतं पक्षत्रयमुक्तम्।[5]

अपशब्देऽपि शक्तिरस्ति।[6] ततोऽपि शाब्दबोधो भवति। किन्तु साधुत्वाभावात् पुण्यजनकता तत्र नास्ति इति शाब्दिकः सिद्धान्तः।[7] सा चेयं शक्तिः, योगो रूढिर्योगरूढिश्चेति त्रिविधाऽस्ति।[8] संयोगविप्रयोगादिभिरस्याः शक्तेर्नियमनमपि हर्य्यादिसम्मतम्।[9] 'सवत्सा धेनुः'[10] इत्यादीन्युदाहरणानि लघुमञ्जूषायां सुष्ठु दर्शितानि, तानि निबन्धे विशदाक्रियन्ते।

वस्तुतः शक्यतावच्छेकारोपरूपां लक्षणां वदन्तो वैयाकरणाः शक्तिस्वरूपामेव लक्षणां मन्यन्ते। यथा 'गङ्गायां घोषः' इत्यत्र सामीप्यसम्बन्धमूलकं गङ्गात्वारोपं तीरे विधाय, तीरे घोष इति बोधः क्रियते। काकेभ्यो दधि रक्ष्यताम् इत्यत्र काकाकाकसमुदाये काकत्वारोपरूपा लक्षणा।

अद्वैतिनां मतेऽपि वाक्ये लक्षणायाः सिद्धये इयमेव सरणिरादृताऽस्ति। उक्तं च वेदान्तपरिभाषायाम्-लक्षणा च पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि।

## लक्षणानिरूपणम्

वैयाकरणमते लक्षणाशक्तिरतिरिक्ता नास्ति, शाब्दबोधजनकपदार्थोपस्थितिं प्रति शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतायां गौरवात्, लक्षणानातिरिक्ता शक्तिरिति सिद्धान्तो महाभाष्यानुमोदितः भूषणसारादिभिरपि तथैव स्वीकृतः। परमलघुमञ्जूषायां श्रीनागेशमहोदयः प्रसिद्धाप्रसिद्धभेदेन शक्तेरेव स्वरूपद्वयं स्वीकृतवान्।

लक्षणा चाप्रसिद्धशक्तिरेवेति तन्मतम्। तत्र आपामरविद्वज्जनवेद्यात्वं प्रसिद्धात्वम्, यथा गङ्गापदस्य भगीरथरथखातावच्छिन्नचलज्जलप्रवाहविशेषे प्रसिद्धा शक्तिः। सहृदयमात्रवेद्यात्वमत्र सिद्धात्वम्, यथा गङ्गायां घोषः इत्यत्र गङ्गापदस्य तीररूपे अर्थे। एषा अप्रसिद्धा शक्तिः लघुमञ्जूषायाम् आरोपितशक्त्यवच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे, व्यक्तिविशेषबोधे वा लक्षणा इति व्यवहारः, इत्युक्त्या परमतसिद्धो लक्षणा इति पदेन सूच्यते, स्वमते तु शक्तिरेवेति, शक्त्यैव तत् पदवाच्यत्वमित्युक्त्या सङ्केतितम्।

## लक्षणालक्षणम्

पूर्वोक्तप्रकारेण शक्यतावच्छेदकारोप एव लक्षणा व्याकरणशास्त्रे मन्तव्या। यथा गङ्गायां घोष इत्यत्र गङ्गात्वस्य तीरे आरोपः। स च गङ्गात्वाभाववत्तीरं गङ्गात्वेन जानीयाद् इति आहार्यरूपः। न तु अनाहार्यभ्रमरूपः। पुंयोगादाख्यायामिति[11] सूत्रे भाष्यकृता संकेतिततश्चायमभिप्रायः, तत्र गोपी इति स्याद् गोपस्येयम् इति गोपसम्बन्धिस्त्रीत्वेन बोधे तस्येदमिति[12] सूत्रेण तद्वशेर्थे अण्प्रत्यये सति गोपी इति स्यात् तादृशवाक्यस्यैव वा साधुत्वं स्यादिति गोपीत्यस्यासाधुत्वमाशङ्क्य नावश्यमयमेवाभिसम्बन्धो भवितुमर्हति, तस्येदमिति। तन्मूलकः सोऽयमित्यभिसम्बन्धोऽपि वर्तते, चतुर्भिः प्रकारैरतस्मिन् स इत्येतद् भवति, तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात् तत्साहचर्याच्च। मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय इत्युदाहरणानि इत्युक्तम्। तत्रैव प्रदीपकारेणापि आरोप्यते तद्रूपम्, न तु मुख्यम्, बालेषु मञ्चत्वारोपात् मञ्चपदप्रवृत्तिः, हसन्तीति पदान्तरप्रयोगाद् विज्ञायते इत्युक्तम्।

वाक्यपदीयेऽपि

**गोत्वानुषङ्गो वाहीके निमित्तात्कैश्चिदिष्यते।**
**अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः॥**[13]

लघुमञ्जूषायामस्य श्लोकस्यायमभिप्रायः प्रदर्शितः कैश्चित् शब्दार्थसम्बन्धनित्यत्ववादिभिर्वैयाकरणैर्जात्यादेर्निमित्ताद्वाहीके गोत्वानुषङ्गं गोत्वसम्बन्ध इत्येतत्। अर्थमात्रमित्यत्र अर्थाविशेषो ग्राह्यः। स्वार्थः प्रवृत्तिनिमित्तम्। तत्र शब्दो व्यवस्थित एवेति नोक्तसम्बन्धस्यानित्यत्वप्रसक्तिरिति।

एवञ्च शक्यतावच्छेदकस्य प्रवृत्तिनिमित्तस्य गोत्वादेरारोपोऽपि शब्दार्थसम्बन्धतया



अङ्गीकृत एवैतन्मतेऽपि इत्याख्यातम्। प्रसिद्धस्य चार्थस्य यत्रार्थे कश्चन सम्बन्धोऽस्ति तत्रैवारोपः इत्यपि जाड्यादेर्निमित्तादित्यनेनात्र ध्वनितम्। एवञ्च स्ववृत्ति, जाड्यसदृशजाड्यवत्त्वं गोः सम्बन्धिनि वाहीके यज्जायते तदेव गोत्वारोपः। गङ्गापदार्थस्य स सामीप्यसम्बन्धो यदा तीरे गृह्यते तदैव गङ्गात्वारोप इति प्रोक्तज्ञानसम्बन्धस्य फलभूतोयमारोप इति च ज्ञेयम्। लक्षणावृत्तेः शक्त्यनतिरिक्तत्वे तदर्थबोधे तदर्थनिरूपितत् तपदनिष्ठशक्तिग्रहः तदधीनतदर्थोपस्थितिश्च कारणमिति एकरूपेणैव कार्यकारणभावः। लक्षणायाः पृथक्त्वादि नैयायिकादिमते तदर्थविषयकशाब्दबोधं प्रति तदर्थनिरूपिततत्पदनिष्ठलक्षणाग्रहस्य तदधीनोपस्थितेश्चापि हेतुतायाः स्वीकारे गौरवं दृढं स्यादेव। तस्मात् नेयं लक्षणाशक्तिः पृथग्भूता अपि तु तदन्तर्गता एवेति वैयाकरणः।

अत्र मते गङ्गायां घोषः इत्यादौ आरोपितगङ्गात्वेन तीरस्य बोधः इति तज्ज्ञानस्य भ्रमत्वेन तत्र गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिद्ध्येत्, अत एव शुक्तौ रजतज्ञाने भ्रमत्ववतः पुरुषस्य इव न तत्र प्रवृत्तिरिति चेदत उच्यते–

मध्ये व्यञ्जनया तीरे गङ्गापदार्थभेदस्यापि प्रतीतेः व्यञ्जनाजन्यज्ञाने अन्वयबोधानुपपत्तिमूलके आरोपितार्थविषयकबोधे च बाधनिश्चयेनाप्रामाण्यग्रहो न जायते, यतो बाधनिश्चये प्रतिबन्धकत्वं हि तद्वता बुद्धेरप्रमात्वबोधनरूपमेव। तच्चानाहार्यज्ञानस्यैव भवितुमर्हति। आहार्यन्तु प्रमाभिन्नमेव। प्रकृते तु आहार्यमेव ज्ञानमिति पूर्वमेवोक्तमिति न तस्य प्रतिबन्ध्यत्वं, नापि प्रतिबन्धकत्वम्, वैयाकरणमते चैतत् प्रत्यक्षभिन्नत्वमपि स्वीकृतमिति प्रकृते तस्य शाब्दबोधात्मकत्वेपि न क्षतिः। अत एव स्थाली पचतीत्यत्र पचिधातुवाच्यव्यापारे स्थालीस्थे एकदेशभूतेपि अधिश्रयणाद्यधःश्रयणान्तव्यापारत्वारोपेण तद्विषयबोधे, नाप्रमात्वग्रहः। अन्यथानुपत्तिपरिहारो न स्यादित्यपि बोध्यम्। कतिपयस्थलेषु वैयाकरणमते कतिपयस्थलेषु आरोपस्य प्रकारः प्रदर्श्यते, तथाहि गङ्गायां घोषः इत्यत्र तु गङ्गात्वारोपः सामीप्यसम्बन्धमूलकः, काकेभ्यो दधि रक्ष्यतामित्यादौ च काकाकाकसमुदाये दध्युपघातकमात्रे काकत्वारोपः, तादृशसमुदायान्तःपातिनि काके यद्यपि काकत्वमस्ति, कथमत्रारोपः, तथापि दध्युपघातकमात्रवृत्तिसमुदायत्वावच्छेदेन तत्समुदाये तस्याभावः एवेति तदभाववति तद्धर्मप्रकारकत्वरूपारोपोऽस्त्येव।

रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि इत्यत्र सौरभविशेषविशिष्टस्य

कमलस्य कमलात्मकव्यक्तिविशेषस्य कमलत्वेन बोधः। तादृशे कमले कमलत्वस्य सत्त्वेपि सौरभातिशयावच्छेदेन तदभावान्नारोपानुपपत्तिः।

रत्नप्रभायां तु लक्षकपदस्य स्वशक्यानवच्छेदकधर्मनिष्ठविशेष्यता-निरूपितस्वशक्यतावच्छेकनिष्ठप्रकारताकप्रतीतिजनकत्वेन तादृशप्रतीतेरेवात्रारोपपदार्थत्वं सिद्धान्तितम्।

तत्तु न समीचीनम्, उक्तप्रकारेण लघुना सर्वसम्मतेनेष्टप्रसिद्धेः। तत्र सौरभरूपे विशेषणे कमलत्वाभाववति कमलत्वारोपे विशिष्टेपि कमलत्वारोपव्यवहारः औपचारिकः। यथा हि–संयुक्तसमवायसन्निकर्षस्य संयोगरूपविशेषणांशे एव तज्जन्यत्वे सति तज्जन्य- जनकत्वरूपं व्यापारत्वं समन्वितं भवति, विशिष्टे तु तदारोप एव। यथा शिखी ध्वस्त इत्यत्र शिखानिष्ठस्य ध्वंसप्रतियोगित्वस्य विशिष्टे आरोपः। तद्वत् सर्वत्र विशिष्टव्यक्तिलक्षणायामारोपव्यवहारसमन्वयः कार्यः।

## व्यञ्जनविचारः

लघुमञ्जूषायां श्रीनागोजिभट्टेनैतद्विचारावसरे संस्कारविशेषो व्यञ्जनासंस्कारे विशेषश्च त्रिविधः इत्युक्तम्। तथाहि यथा लक्षणायाः मुख्यार्थबाधग्रहपूर्वकत्वमेव बोधो जन्यते, तथात्र न भवति अपि तु मुख्यार्थस्य बाधोस्तु न वास्तु अनया तु बोधः क्रियत एवेति मुख्यार्थबाधनिरपेक्षबोधजनकत्वं संस्कारे प्रथमं विशेषणम्। लक्षणायां तु मुख्यार्थसम्बद्धस्यैव अप्रसिद्धस्यैव बोधः क्रियते, अनया तु अन्यथापि क्रियते एवेति–मुख्यार्थसम्बन्धासम्बन्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः। उक्तसंस्कारस्योद्बुद्धानुद्बुद्धत्वसाधारण्येन। सर्वत्रैव सर्वेषामनया बोधः स्यादिति दोषवारणाय वक्त्रादिवैशिष्ट्ये ज्ञानस्यैतज्जन्यबोधे सहकारित्वं स्वीक्रियते, इति वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धत्वमपि तत्र तृतीयो विशेषः।

अस्या वृत्तेः स्वीकारे कलाकृतां श्रीबालम्भट्टानां युक्तयः–लघुमञ्जूषायाः कलाटीकायां श्रीबालम्भट्टेनास्याः समर्थने बह्व्यः युक्तय उपस्थापिताः सन्ति। तथा हि–"यत्तु गतोऽस्तमर्कः" इत्यादौ न व्यञ्जना पदमाधातुमर्हति, एकसम्बन्धिदर्शनाद-परसम्बन्धिस्मरणवत् स्मृत्यैवोपपत्तेरिति, तत्र सम्यक्, उक्तवाक्यश्रवणसमनन्तरं सन्ध्यावन्दनं कर्तव्यम् इति मया स्मृतमित्यनुव्यवसायाभावात्, तत्रानुल्लेखाच्च। इदं पदमेतदर्थस्य न वाचकम्, नापि लक्षकम्, नापि स्मारकम्, अपि तु व्यञ्जनया



बोधकमिति प्रामाणिकव्यवहारेण शक्त्यादिभिन्नाया अस्याः स्वीकाराच्च। असम्बद्धस्यापि अनया बोधदर्शनाच्च[14] इति।

**आलङ्कारिकाणां मते व्यञ्जनालक्षणम्**–रसरूपस्यात्मनोऽभिव्यक्तये आलङ्कारिकैरङ्गीकृता स्वप्राणभूते वा व्यञ्जना नाम शब्दस्य वृत्तिः। लक्षणं चास्या बहुत्रोल्लिखितं तदीयैः। यथा काव्यप्रकाशटीकाकृता श्रीवामनाचार्येण–"व्यञ्जना च शक्तिलक्षणाद्यजन्यप्रतीतिजनकः पदादिगतो व्यापारः"[15] इत्युक्तम्। श्रीहरिदास-भट्टाचार्येणापि वाच्यादिभिन्नार्थप्रतिपादकत्वे सति वृत्तित्वमिति शब्दतो भिन्नं तदेव लक्षणमनूदितम्।[16]

इदं लक्षणं मूलग्रन्थत एव निःसरति। तथा च–

**विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥**[17]

शब्दस्य ज्ञानस्य क्रियायाश्च व्यापारः सकृदेव स्वकार्यसम्पादनेनोपक्षीणीयो भवतीति कार्यान्तरार्थं पुनरन्यो व्यापारोऽपेक्ष्यत इति नियमेनाभिधादीनां निवृत्तौ सत्यां व्यञ्जनाख्यो व्यापार आश्रीयते। व्यञ्जन-ध्वनन-गमन-प्रत्यायनादिशब्दैरपि अयमेव व्यापारः सङ्केतितो भवति।[18]

❖

सन्दर्भग्रन्थाः

1. पाणिनिसूत्र 1.1.1 वृद्धिरादैजिति सूत्रात् तात्पर्यं ध्वनयति अभेदविषये सूत्रकारः।
2. वा.प. 3.3.28
3. वैयाकरणभूषणसारः शक्तिनिरूपणम्
4. परमलघुमञ्जूषार शक्तिनिरूपणम्
5. म.भा. 1.2.64
6. म.भा. 1.1.1, ल.म. शक्तिनिरूपणम्, पृ.सं.69
7. वा.प. 1.27, 153-154
8. ल.म. शक्तिनिरूपणम्, पृ.सं.88-89
9. वा.प. 2.317-18
10. ल.म.शक्तनिरूपणम् पृ.सं.90-91
11. पा.सू. 4.1.48
12. पा.सू. 4.3.120
13. वा.प. 2.257
14. वैयाकरसिद्धान्तलघुमञ्जूषा पृ.163
15. का.प्र. 2.12
16. कुसु. साहित्यदर्पणटीका 2 परि
17. सा.द. 2.12-13
18. सा.द. 2.12-13

❖



# वृक्षदोहदमूलककविप्रसिद्धीनां समीक्षणम्

बबुआनारायणमिश्रः

काव्यहेतुं निरूपयताचार्यमम्मटेनोक्तम्–

"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥"[1]

इत्थं शक्तिर्निपुणताभ्यासश्च–एतत्त्रयमपि काव्यस्य समुदितरूपेण कारणम्। अत्र शक्तिः संस्कारविशेषरूपेण विवक्षिता। लोकशास्त्रकाव्याद्यवेक्षणान्नैपुण्यं प्राप्यते। कविभिर्यावद् लोकशास्त्रकाव्यानामवेक्षणं क्रियते तावदेव तेषां काव्येषु रमणीयतातिशयो दृश्यते। यद्यपि कविवाङ्निर्मितिर्नियतिकृतनियमरहिता भवति तथापि तत्र शास्त्रस्य लोकस्य वा मूलं भवत्येव। यानशास्त्रीयालौकिकपरम्परागतार्थान् कवयः काव्येषूपनिबध्नन्ति ते कविप्रसिद्धयः इति राजशेखरो मन्यते।[2] न हि निर्मूला काचित्प्रसिद्धिर्भवति। प्रसिद्धिषु परम्परासु च किमपि शास्त्रीयं लौकिकं वा मूलं भवत्येव। तत्कविप्रसिद्धिषु वृक्षदोहदविषयिण्यः कविप्रसिद्धयः प्रमुखास्सन्ति।

दोहदशब्द इच्छापरपर्यायः। सम्प्रति शब्दोऽयं गर्भिण्या इच्छाविषये एव रुढः। गर्भिण्या दोहदस्य पूर्तिरवश्यं कर्त्तव्येति शास्त्रनिर्देशः। यदि दोहदस्य पूर्तिर्न क्रियेत तर्हि गर्भो दूषितो भवति।[3] प्राप्तदोहदा वीरं दीर्घजीविनञ्च पुत्रं जनयति।

ज्यौतिषशास्त्रेऽपि यात्रायां प्रतिकूलनक्षत्रतिथिवाराणां कृते दोहदव्यवस्था विहिता विद्यते।[4] तत्र दोषनिवारणफलको दोहदः। वृक्षेष्वप्यकालफलपुष्पोद्गमायाधिकफलपुष्पोद्गमाय वा य उपचारः क्रियते स दोहदः–

"तरुगुल्मलतादीनामकाले कुशलैः कृतम्।
पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया॥"[5]

महाकविश्रीहर्षेणापि नैषधीयचरिते दोहदबलेन वृक्षा अकाले कोरकमुद्गिरन्तीति वर्णितम्।[6] यथा प्राप्तदोहदा स्त्री वीरं पुत्रं जनयति तथैव प्राप्तदोहदो वृक्षः पुष्टं फलं ददाति। काव्येषु विविधवृक्षाणां लतानाञ्च कृते यथाप्रसङ्गं विविधदोहदानां वर्णनं दरीदृश्यते।

महाकविश्रीहर्षेण नैषधीयचरिते दोहदधूपयुक्तदाडिमस्य वर्णनं विहितम्–

**फलानि धूमस्य धयानधोमुखान्स दाडिमे दोहदधूपिनि द्रुमे।।[7]**

दमयन्त्याः कुचयोः पीनता तुङ्गता चातीव प्रसिद्धा। प्रकृते दोहदधूपिनि दाडिमे कविनोत्प्रेक्षितं यत्नलेन दाडिमफलानि दमयन्त्याः कुचयोः तुङ्गताप्त्यर्थमधोमुखा धूमपानेन तपश्चरतः घटा इव दृष्टानि।

अत्र दमयन्त्याः कुचयोः सौन्दर्यातिशयो व्यङ्ग्यः तथा च दोहदधूपेन दाडिमानि पुष्टानि भवन्तीत्यपि ज्ञायते। उपवनविनोदे वृक्षाणां पोषणार्थं विविधोपाया वर्णिताः। तत्र दाडिमपोषणोपायं प्रदर्शयतोक्तमाचार्येण–

**यस्त्रिफलाशफरीघृतलिप्तो धूपित आज्यफलत्रयधूपैः।**
**आशु फलैरिह दाडिमशाखी तालफलानि विडम्बयतीव।।[8]**

महाकविश्रीहर्षवर्णितदोहदधूपस्य मूलमत्र दृश्यते। वर्तमानकालेऽपि शास्त्रप्रदर्शितोपायोऽयं जनैराद्रियते तथा च फलसिद्धिरपि दृश्यते। वृक्षायुर्वेदे विविधधूपनद्रव्याणां वर्णनं विद्यते। वृक्षाणां विवाहोत्सवे अन्यविधोत्सवे च धूपनं वृक्षाणां श‍ृङ्गाराङ्गम्। महाकविकालिदासेन धूपनस्य वर्णनं कामिनीकचसंस्कारकरूपेण कृतम्।[9] यथा धूपनेन कामिनीकचाः पुष्टाः सुगन्धोपेताः कृष्णाश्च भवन्ति तथैव वृक्षा अपि धूपनेन पुष्टाः पुष्पवन्तः फलवन्तश्च भवन्ति।

**''धूपिताः कुणप-क्षौद्रैः प्रयत्नेन महीरुहाः।**
**अकाले फलपुष्पाणि वितन्वन्ति न संशयः।।''[10]**

वृक्षाणां विवाहो न केवलं धार्मिकदृष्ट्यापि तु दोहददृष्ट्याऽपि क्रियते। धार्मिक- दृष्ट्या तुलस्या विवाहः अतीव प्रसिद्धः। महाकविकालिदासेन वियुक्तस्याजस्य तया पुनः संयोगाकाङ्क्षायाः प्रसङ्गे आम्रप्रियङ्गुलतयोर्विवाह उपवर्णितः–

**''मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ।**
**अविधाय सत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्।।''[11]**



अभिज्ञानशाकुन्तलेऽपि लताम्रयोर्विवाहप्रसङ्ग उपस्थापितः–

**''सङ्कल्पितं प्रथममेव मया त्वदर्थे भर्त्तारमात्मसदृशं स्वगुणैर्गतासि।**
**अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः कान्तं समीपसहकारमिमं करिष्ये।।''[12]**

कविवचनैरेभिः स्पष्टं यद्यदि लतानां वृक्षैः परिणयः क्रियते चेत्तासां विकासो भवति। लतावृक्षयोर्विवाहस्य परम्परा वर्तमानभारतीयसमाजेऽपि दृश्यते। वृक्षायुर्वेदे लतार्थपरिणयोपायः प्रदर्शितः–

**''कन्येव चारुनेपथ्या कृतकौतुकमङ्गला।**
**प्राप्तपाणिग्रहा श्यामा पुष्प्यत्यासन्नशाखिना।।''[13]**

शास्त्रवचनेनानेन स्पष्टं यल्लतासु यदि पुष्पाणि नैव प्रस्फुटन्ति तर्हि तासां वृक्षैः परिणयः क्रियते। तासां परिणय एव तासां दोहदः। कामिनीनां मन्मथभावास्तथा च तज्जन्यानुभावा अपि वृक्षाणां दोहदा भवन्ति।

ननु वृक्षाः मानवीयमन्मथभावं तथा च तज्जन्यानुभावान् कथमवगच्छेयुरिति चेन्न, स्पर्शमात्रेण समङ्गायां (लज्जावन्ती ति भाषायाम्) सङ्कोचदर्शनात् तर्जन्या तर्जनमात्रेण कूष्माण्डकलिकामरणादिलोकसिद्धसत्यदर्शनाच्च। तर्जनमात्रेण कूष्माण्ड-कलिकामरणरूपलोकसिद्धसत्यस्योपस्थापनं तुलसीदासेन रामचरितमानसे लक्ष्मणपरशुराम संवादे सम्यग्रीत्या कृतम्।[14] न चालिङ्गनादिभिः काकतालीयन्यायेन वृक्षा विकसन्तीति वक्तव्यम्, वृक्षायुर्वेदशास्त्रे वृक्षाणां कृते तद्दोहदविधानात्।

कालिदाससाहित्यस्य प्रसिद्धटीकाकारमल्लिनाथेन बह्व्यो दोहदाकाङ्क्षाः संगृहीताः–

**''स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलः सीधुगण्डूषसेकात्**
**पादाघातादशोकस्तिलककुरबकौ वीक्षणालिङ्गनाभ्याम्।**
**मन्दारो नर्मवाक्यात्पटुमृदुहसनाच्चम्पको वक्त्रवाताच्**
**चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात् कर्णिकारः।।''[15]**

इत्थं प्रियङ्गुः स्त्रीणां स्पर्शाद् विकसति। स्त्रीस्पर्श एव प्रियङ्गुदोहदः। दोहदस्यास्य मूलं चरकसंहितायां दृश्यते–

**''प्रियङ्गुकाचन्दनरूषितानां स्पर्शाः प्रियाणाञ्च वराङ्गनानाम्।''[16]**

9. जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै–
बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः। मेघदूतम्, 1/32
10. सुरपालमुनिविरचितवृक्षायुर्वेदः, श्लोकसंख्या-231
11. रघुवंशमहाकाव्यम्, 8/61
12. अभिज्ञानशाकुन्तलम्, सं. पं. शिवप्रसादद्विवेदी, 4/15
13. वृक्षायुर्वेदः, सुरपालमुनिः, श्लोक सं. 151
14. इहाँ कुम्हड़बतिया कोउ नाहीं।
जे तरजनी देखि मरि जाहीं।। रामचरितमानस, बालकाण्ड
15. मेघदूतस्य 2/18 श्लोकस्य मल्लिनाथकृतव्याख्यायाम्।
16. चरकसंहितास्थदाहचिकित्सायाम्
17. रत्नावलीनाटिका, 1/18
18. वृक्षायुर्वेदः, श्लोक सं.147
19. रघुवंशमहाकाव्यम्, 9/36
20. कुमारसम्भवम्, 3/26
21. वृक्षायुर्वेदः, श्लोक सं. 149
22. रत्नावलीनाटिका, 1/18
23. काव्यमीमांसा, अध्यायः 18
24. वृक्षायुर्वेदः, श्लोक सं. 150
25. मेघदूतम्, 2/4
26. ऋतुसंहारम्, 6/3
27. नैषधीयचरितम्, 1/86
28. ऋतुसंहारम्, 6/34
29. वामनभट्टबाणप्रणीतपार्वतीपरिणयम्, 3/6
30. तत्रैव
31. ऋतुसंहारम्, 6/6

❖